# दीपकम्

## सप्तमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

0772

विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

© NCERT not to be republished

**0772 – दीपकम् – कक्षा 7**
सप्तमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

**ISBN 978-93-5729-686-1**

**प्रथम संस्करण**
*अप्रैल 2025 चैत्र 1947*

**PD 1000T BS**

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2025***

**₹ 65.00**

*एन.सी.ई.आर.टी. वॉटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नई दिल्ली 110 016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा पुष्पक प्रेस प्राइवेट लिमिटेड, 203 & 204, डी.एस.आई.डी.सी. कॉम्प्लेक्स, ओखला, इंडस्ट्रियल एरिया, फेज-1, नई दिल्ली–110020 द्वारा मुद्रित।

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशन की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरू 560 085** फोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट : धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लेक्स
मालीगाँव
**गुवाहाटी 781 021** फोन : 0361-2676869

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *जहान लाल* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| संपादन सहायक | : | *अंजू शर्मा* |
| उत्पादन अधिकारी | : | *सुनील शर्मा* |

**आवरण एवं चित्रांकन**
*अचिन जैन*
*ग्रीन ट्री डिजाइनिंग स्टूडियो प्रा. लि.*

© NCERT not to be republished

# पुरोवाक्

राष्ट्रियशिक्षानीतिः २०२० राष्ट्रस्य कृते एकस्याः एवंविधशिक्षाप्रणाल्याः परिकल्पनां करोति या भारतीयमूल्यानां सभ्यतायाः उपलब्धीनां च उपरि आधारिता अस्ति। सर्वेषु क्षेत्रेषु मानवप्रयासाः ज्ञानानि च अस्यां नीतौ अन्तर्निहितानि सन्ति। एवं च एषा छात्रान् एकविंशतेः (२१) शताब्द्याः सम्भावनानां प्रत्याह्वानानां च कृते सन्नद्धान् करोति। राष्ट्रिय-पाठ्यचर्या-रूपरेखा (एन्.सी.एफ्.एस्.ई.) २०२३ अस्याः महत्त्वाकाङ्क्षिदृष्टेः आधारं प्रस्थापयति। एषा रूपरेखा प्रत्येकं स्तरेषु विभिन्नपाठ्यक्रममाध्यमेन शिक्षायाः दिग्दर्शनं करोति।

आधारस्तरे प्राथमिकस्तरे च छात्राणां स्वाभाविकक्षमतानां विकासः कृतः। मानवास्तित्वस्य पञ्चस्तरान् पञ्चकोशान् लक्ष्यीकृत्य अयं विकासः सङ्कल्पितः। एतदनन्तरं मध्यस्तरे छात्राणां शिक्षणम् अग्रे वर्धयितुं मार्गः प्रशस्तीकृतः। मध्यस्तरः प्राथमिकमाध्यमिकस्तरयोः सेतुबन्धकार्यं करोति। अस्य मध्यस्तरस्य अवधिः भवति वर्षत्रयम्। अस्मिन् स्तरे राष्ट्रिय-पाठ्यचर्या-रूपरेखा (एन्.सी.एफ्.एस्.ई.) २०२३ इत्यस्य लक्ष्यं भवति यत् छात्राः आवश्यककौशलैः सह सन्नद्धाः स्युः इति। एतानि कौशलानि तेषां जीवने पुरोगमनाय प्रगतये च साहाय्यम् आचरन्ति। एषा रूपरेखा छात्राणां विश्लेषणात्मक-वर्णनात्मक-क्षमतानां तथा च आख्यानात्मकानां विकासार्थं प्रयासं करोति। किञ्च आगम्यमानानां प्रत्याह्वानानाम् अवसराणां च कृते तान् सज्जान् करोति।

अस्मिन् स्तरे विविधाः पाठ्यक्रमाः प्रदत्ताः येषु नवविषयाः सम्मिलिताः सन्ति। एषु विषयेषु तिस्रः भाषाः सन्ति, यासु अन्यूनं भाषाद्वयं भारतीयमूलं स्यात्। एतदतिरिच्य विज्ञानं गणितं सामाजिकविज्ञानं कलाशिक्षा शारीरिकशिक्षा व्यावसायिकशिक्षा चेति इतरे विषयाः अन्तर्भूताः स्युः। एवंविधः विविधविषयात्मकः पाठ्यक्रमः छात्राणां सर्वाङ्गीणविकासाय सहायकः भवेत्।

एतादृश्याः परिवर्तनकारिशिक्षणसंस्कृतेः कृते केचन आवश्यकनिबन्धाः भवन्ति। तेषु अन्यतमम् अस्ति विविधपाठ्यक्षेत्राणां कृते उपयुक्तानि पाठ्यपुस्तकानि। एतानि पाठ्यपुस्तकानि पाठ्यविषय-शिक्षणशास्त्रयोः मध्ये सेतुरूपाणि भविष्यन्ति। प्रत्यक्षशिक्षणस्य जिज्ञासापूर्वस्य अनुसन्धानस्य अवसराणां च मध्ये समुचिते भारसाम्यस्थापने एतेषां पाठ्यसामग्रीणां भूमिका भवेत्।

आवश्यकनिर्बन्धेषु अन्यतमम् अस्ति कक्षायाः समुचितं प्रबन्धनं तथैव शिक्षकाणां सुष्ठु प्रस्तुतिः अपि महत्त्वपूर्णा एतद्द्वयं एकस्मिन् पाठ्यविषये विभिन्नपाठ्यविषयेषु च उपस्थापितानां तथ्यानां विचाराणां मध्ये सम्बन्धस्थापने अत्यावश्यकम् अस्ति।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् छात्रेभ्यः उच्चगुणवत्तायुक्तानि पाठ्यपुस्तकानि प्रदातुं प्रतिबद्धा अस्ति।

© NCERT not to be republished

अमुम् उद्देश्यं साधयितुं विभिन्नाः पाठ्यक्रमक्षेत्रसमूहाः निर्मिताः सन्ति। एषु समूहेषु प्रमुखाः विषयविशेषज्ञाः शिक्षाविदः अनुभवशालिनः शिक्षकाः च अन्तर्भूता सन्ति। एतैः एवंविधानां पाठ्यपुस्तकानां विकासाय उत्कृष्टः प्रयासः कृतः।

'दीपकम्' इति सप्तमकक्षायाः संस्कृतपाठ्यपुस्तकम् एतादृशः एकः साधुप्रयासः अस्ति। एतदीयपाठेषु समाहिताः कथाः, कविताः, श्लोकाः, निबन्धाः, सूक्तयः च आदर्शजीवनाय कोमलमतिच्छात्रेभ्यः मार्गदर्शनं करिष्यन्ति। तथैव अनायासं भाषाकौशलविकासार्थं च साहाय्यं करिष्यन्ति।

एतेषु लघु-लघुपाठेषु सामाजिक-सांस्कृतिक-भौगोलिक-विविधतया सह राष्ट्रैक्यस्यापि सुचारु निदर्शनं विद्यते। छात्राणां स्वजीवनस्य अनुभवस्यापि यत्र तत्र प्रतिबिम्बं परिलक्ष्यते। 'दीपकम्' इति पुस्तके भारतीय-ज्ञानपरम्परायाः सांस्कृतिकसमाजस्य च तत्त्वानि समाहितानि सन्ति। एतस्मिन् नैतिकमूल्यबोधः पर्यावरणसचेतनता लैङ्गिकसमानता च सुचारुरूपेण निहिताः सन्ति। एतत् पाठ्यपुस्तकम् अस्मदीयानां शैक्षिकाणाम् उद्देश्यानां सम्यक् पूर्तिं करोति।

एतस्य प्रथमं लक्ष्यं छात्रेषु स्वाभाविकजिज्ञासायाः प्रोत्साहनम् अस्ति। द्वितीयमुद्देश्यम् अस्ति यत् श्रवण-सम्भाषण-पठन-लेखनानां भाषादक्षतानां विकासः। अनयोः उद्देश्ययोः सम्पूर्त्यर्थम् अनेके अभ्यासाः कार्यकलापाः च अस्मिन् सुविचार्य प्रस्तुताः सन्ति। अवतरणिका शब्दार्थाः अभ्यासकार्याणि अवधेयांशाः योग्यताविस्तरः परियोजनाकार्यं च इत्यादिभिः सुसज्जिताः पाठाः छात्रान् सहजतया भाषाधिगमे विषयाधिगमे च प्रवर्तयिष्यन्ति। पुस्तकान्ते शब्दरूप-धातुरूप-मात्राधिगमैः समवेतं परिशिष्टम् अपि छात्राणां साधु-भाषाप्रयोगे ज्ञानसम्पादने च सहायकं भविष्यति।

यद्यपि भाषायाः अधिगमार्थम् अधिग्रहणार्थं च पाठ्यपुस्तकम् अत्यन्तम् उपकारकम् अस्ति इत्यत्र नास्ति विप्रतिपत्तिः तथापि अन्यसंसाधनानाम् उपयोगार्थं छात्राः अवश्यमेव प्रेरणीयाः। विद्यालयीय-ग्रन्थालयाः संसाधनानाम् उपलब्ध्यर्थं महत्त्वपूर्णां भूमिकाम् आवहन्ति। एतदतिरिक्तम् अभिभावकानां मातापितॄणां शिक्षकाणां च भूमिका महत्त्वपूर्णा भवति। ते छात्रेभ्यः समुचितं मार्गदर्शनं प्रोत्साहनं च कर्तुं नितान्तं सहायकाः भवन्ति।

एतेन अभिप्रायेण सह पाठ्यपुस्तकस्य विकासे योगदानं कृतवद्भ्यः सर्वेभ्यः विद्वद्भ्यः अहं हार्दीं कृतज्ञतां प्रकटयामि तेषाम् अभिनन्दनं च करोमि। एतत् पुस्तकं सर्वेषां हितभागिनां प्रत्याशाः चरितार्थाः करिष्यति इति आशासे। यौगपद्येन सर्वेभ्यः उपयोगकर्तृभ्यः परामर्शान् प्रतिक्रियाः च सादरम् आमन्त्रये। तेन च आगामि-संवत्सरेषु एतत् पुस्तकम् उन्नततरं भवेत् इति मे मतिः।

दिनेशप्रसादः सकलानी
*निदेशकः*
राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

नवदेहली
अप्रैल, २०२५

© NCERT not to be republished

# भूमिका

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः॥**

भारतीयभाषापुष्पाणां सौन्दर्यस्य सौरभस्य च आधारो भवति संस्कृततरुः। असौ यावान् स्वस्थो भवति भारतीयभाषाः तावत्यः समृद्धाः भवन्ति। प्रान्तीयभाषाणां मातृभाषाणां च विकासस्य प्रमुखो आधारः संस्कृतभाषा। इयं भारतीयज्ञानविज्ञानपरम्परायाः प्रमुखं स्रोतः। वेदेषु उपनिषत्सु स्मृतिषु पुराणेषु च अस्मत्पूर्वमनीषिभिः संस्कृतभाषयैव तेषामनुभवात्मकं ज्ञानविज्ञानपुञ्जं समाहृतम्। अतः भारतीयज्ञान-सुमसौरभ-लुब्धाः विदेशविद्वद्दलयः स्वतः समाकृष्टाः आगच्छन् भारतवर्षम्। भारतीयत्वेन इदम् अस्मद् गौरवम्। भारतीयानां विश्वप्रतिष्ठायां कारणीभूता भवति वसुधैवकुटुम्बिनी संस्कृतिः, या वै संस्कृतमाध्यमा अस्ति। अतः भारतीयसंविधानस्य अष्टमानुसूच्यां समादृता संस्कृतभाषा।

राष्ट्रियशिक्षानीतौ (२०२०) भारतीयज्ञानपरम्परामादृत्य शिक्षाव्यवस्था परिकल्पिता। अद्यतनाः बालाः भविष्यत्कालिकाः राष्ट्रनायकाः। अमी भारतीयविचारेषु संस्कृतिषु च यथा श्रद्धधानाः भवेयुः तदर्थमाधुनिकी शिक्षा व्यवस्था यतमाना भवेत्। विषयमेतं मनसि निधाय शिक्षाशास्त्रीयतत्त्वानि च स्मारं स्मारं स्तरानुकूलं दीपकाख्यं पाठ्यपुस्तकमिदं साधु ग्रथितम्। सप्तमकक्षायै सङ्कलितेऽस्मिन् पुस्तके बालानामभिरुचिसंवर्धकाः विविधवर्णयुताः सचित्रपाठाः, सरलात्कठिनं प्रति, ज्ञातादज्ञातं प्रति, स्थूलात् सूक्ष्मं प्रति, विशेषात् सामान्यं प्रति इत्यादि-सूत्राणि आदाय क्रियामुखाधिगमः, अभिरुचिसिद्धान्तः, प्रेरणासिद्धान्तः इत्यादीन् सिद्धान्तान् क्रीडा-परियोजनादि-विविधविधीन् च आदाय सरलमानकसंस्कृतेन पाठाः विरचिताः। अस्मिन् राष्ट्रभावभरितं मूल्यपरकं स्वास्थ्यकारकं सामाजिकं सांस्कृतिकम् आध्यात्मिकम् ऐतिहासिकं च तत्त्वचयमादाय मनोरञ्जकाः कथाः, सुभाषितानि, तार्किकविचारसंवलिताः गद्यांशाः नाटकानि च छात्रशिक्षकान्तःक्रियाभिः कक्षावैविध्यं सम्पादयेयुः। पाठान्ते शब्दार्थपरिचयः भाषिकतत्त्वानि परियोजनाकार्याणि मनोवैज्ञानिकरीत्या सङ्ग्रथितानि। भारतीयज्ञानपरम्पराः आदाय विनिर्मितमिदं पुस्तकं राष्ट्रियशिक्षानीतेः संस्तुतीरनुसरत् छात्रसर्वाङ्गीणविकासमुद्दिशतीति महत्त्वावहं राजते। संस्कृतभाषायाः व्यावहारिकं पक्षमादाय अस्मिन् पुस्तके सरलमानकसंस्कृतेन विषयावतारः, जिज्ञासोत्पादक-अवतरणिकाधारिताः सचित्रपाठाः, भाषाकौशलाधारितानि अभ्यासकार्याणि च प्रदत्तानि, यानि छात्राणां भाषाधिगमे नितरां सहायकानि

© NCERT not to be republished

भवेयुः, स्वाध्यायं प्रति च प्रेरयेयुः। पाठ्यपुस्तकरचनासिद्धान्तान् अवलम्ब्य विनिर्मितं पाठ्यपुस्तकमिदं छात्राणां समाजीकरणप्रक्रियायां महत्तरं स्थानमुपकल्पयिष्यतीति भृशं तर्कयामः।

**पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद्भजन्ते, मूढः परप्रत्ययनेयबुद्धिः॥**

इत्येवं मालविकाग्निमित्रनाटकस्थं महाकवेः कालिदासस्य वचः स्मारं स्मारम् अस्य पुस्तकस्य पाठकानां नव-नव-विकासशीलप्रस्तावाः स्वागतार्हाः॥

समन्वयकः
जतीन्द्रः मोहनः मिश्रः
*आचार्यः*, भाषा-शिक्षा-विभागः,
रा.शै.अ.प्र.प., नव-देहली

© NCERT not to be republished

# राष्ट्रिय-पाठ्यक्रम-शिक्षणाधिगम-सामग्री-समितिः (एन्.एस्.टी.सी.)

महेशचन्द्रः पन्तः, *कुलाधिपतिः*, राष्ट्रिय-शैक्षिक-योजना-प्रशासन-संस्थानम् — **अध्यक्षः**

मञ्जुलः भार्गवः, *आचार्यः*, प्रिन्सटन-यूनिवर्सिटी, यू.एस्.ए. — **सह-अध्यक्षः**

सुधा मूर्तिः, *प्रतिष्ठिता लेखिका शिक्षाविद् च*

बिबेकः देबरॉयः, *अध्यक्षः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

शेखरः माण्डे, *पूर्व-महानिदेशकः*, सी.एस्.आई.आर्. तथा *आचार्यः*, सावित्रीबाई-फुले-पुणे-विश्वविद्यालयः, पुणे

सुजाता रामदोरई, *आचार्या*, ब्रिटिश्-कोलम्बिया-विश्वविद्यालयः, कनाडा

शङ्करः महादेवन्, *संगीत-विशेषज्ञः*, मुम्बई

यू. विमलकुमारः, *निदेशकः*, प्रकाश-पादुकोण-बैडमिण्टन्-अकादमी, बेङ्गळूरुः

मिशेल् दनिनो, *अतिथि-आचार्यः*, आई.आई.टी., गान्धीनगरम्

सुरीना राजन्, *आई.ए.एस.*, हरियाणा (सेवानिवृत्ता) तथा *पूर्व-महानिदेशिका*, एच्.आई.पी.ए.

चमूकृष्णः शास्त्री, *अध्यक्षः*, भारतीय-भाषा-समितिः, शिक्षा-मन्त्रालयः, भारत-सर्वकारः

संजीवः सान्यालः, *सदस्यः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

एम्.डी. श्रीनिवासः, *अध्यक्षः*, सेण्टर्-फॉर्-पॉलिसी-स्टडीज्, चेन्नई

गजाननः लोण्ढे, *अध्यक्षः*, योजना-कार्यालयः (प्रोग्राम्-ऑफिस्), एन्.एस्.टी.सी.

रेबिनः छेत्री, *निदेशकः*, एस्.सी.ई.आर्.टी., सिक्किमः

प्रत्यूषकुमारः मण्डलः, *आचार्यः*, सामाजिक-विज्ञान-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

दिनेशकुमारः, *आचार्यः*, विज्ञान-गणित-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

कीर्तिः कपूरः, *आचार्या*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

रञ्जना अरोड़ा, *आचार्या अध्यक्षा च*, पाठ्यचर्या-अध्ययन-विकास-विभागः, रा.शै.अ.प्र.प., नव-देहली — **सदस्य-सचिवा**

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,**
भारतं
[**सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं,**
**लोकतन्त्रात्मकं गणराज्यं विधातुं**][1]
तस्य समस्तान् नागरिकांश्च
सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं,**
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां,**
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][2] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;
कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्,**
**आत्मार्पितं च कुर्महे।**

---

१ संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

२ उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

© NCERT not to be republished

# पाठ्यपुस्तक-निर्माण-समितिः

**अध्यक्षः, संस्कृत-पाठ्यपुस्तक-निर्माण-समितिः**

चान्दकिरणः सलूजा, *न्यासी निदेशकः च*, संस्कृत-संवर्धन-प्रतिष्ठानम्, नव-देहली

**संस्कृत-पाठ्यपुस्तक-निर्माण-समितिः**

कुमारः बागेवाडिमठः, *सहायक-आचार्यः*, शिक्षा-विभागः, राष्ट्रिय-संस्कृत-विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

डम्बरुधरः पतिः, *सहायक-आचार्यः*, शिक्षा-विभागः, जयपुर-परिसरः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जयपुरम्, राजस्थानम्

दिवाकरः शर्मा, *टी.जी.टी. संस्कृतम्*, पी.एम्.श्री केन्द्रीयविद्यालयः क्र.-2, ए.एफ्.एस्., ग्वालियरम्, मध्यप्रदेशः

देवकीनन्दनः, *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

निधिः वेदरत्नः, *टी.जी.टी. संस्कृतम्*, कोर्-अकादमिक्-इकाई, परीक्षा-शाखा, शिक्षा-निदेशालयः, देहली-सर्वकारः, नव-देहली

मदनकुमारः झा, *सहायक-आचार्यः*, शिक्षा-शास्त्र-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरणवीर-परिसरः, कोट-भलवालः – जम्मू, जम्मू-कश्मीरः

मनोरमा, *सहायक-आचार्या*, संस्कृत-विभागः, ज़ाकिर-हुसैन-दिल्ली-कॉलेज्, नव-देहली

मुकेशकुमारः, *सहायक-आचार्यः*, सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः

यासमीन अशरफ़ः, *सहायक-आचार्या* (भाषा-शिक्षा), शिक्षा-विभागः, क्षेत्रीय-शिक्षा-संस्थानम्, अजमेरः, राजस्थानम्

वन्दना जे., *शैक्षणिक-निदेशिका*, शारदा-गुरुकुलम्, चेम्मण्टा, त्रिशूरः, केरला

वाचस्पतिनाथः झा 'मणिः', *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

वेङ्कटसुब्रह्मण्यः पी., *निदेशकः*, व्योम-लिङ्ग्विस्टिक्-ल्याब्स्-फाउन्डेशन, बेङ्गळूरुः, कर्नाटकः

संभाजिः विट्ठलः पाटीलः, *सहायक-आचार्यः*, वसन्तराव-नाईक-शासकीय-कला-समाजविज्ञान-संस्था, नागपुरं, महाराष्ट्रम्

सिद्धार्थः ए. भार्गवः, *मुख्य-परामर्शकः सदस्यः च*, एन्.एस्.टी.सी. – योजना-कार्यालयः – संस्कृतं भारतीय-ज्ञान-परम्परा च (आई.के.एस्.) सी.ए.जी., तथा *निदेशकः*, ओं शान्तिधाम – वेद-गुरुकुलम्, बेङ्गळूरुः, कर्नाटकः

सुशान्तकुमारः रायः, *सहायक-आचार्यः*, शिक्षाशास्त्र-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीसदाशिव-परिसरः, पुरी, ओडिशा

सूर्यमणिः भण्डारी, *सहायक-आचार्यः*, व्याकरण-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

**सदस्य-संयोजकः**

जतीन्द्रः मोहनः मिश्रः, *आचार्यः*, भाषा-शिक्षा-विभागः तथा संयोजकः, पाठ्यचर्या-क्षेत्र-समूह, संस्कृतं, रा.शै.अ.प्र.प., नव-देहली

© NCERT not to be republished

# कार्तज्ञ्यम्

पाठ्यपुस्तकस्यास्य निर्माणप्रक्रियायां मार्गदर्शने समीक्षायां च बहुमूल्ययोगदानार्थं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् *राष्ट्रिय-पाठ्यचर्या-रूपरेखा*–पर्यवेक्षणसमितेः सदस्यैः सह अध्यक्षेभ्यः संस्कृतभाषायाः पाठ्यपुस्तक-निर्माण-समितेः सर्वेभ्यः सदस्येभ्यः अन्येभ्यः अन्तःसम्बन्धिविषयाणां पाठ्यपुस्तक-निर्माण-समितीनाम् अध्यक्षेभ्यः सदस्येभ्यश्च कार्तज्ञ्यं प्रकटयति।

प्रो. मीरा-भार्गव-महाशयाः पुस्तकस्य कात्स्न्र्येन पुनरीक्षणं कृत्वा प्रतिपुष्टिप्रदानेन अस्मान् अनुगृहीतवत्यः। तदर्थं ताभ्यः भूरिशः धन्यवादान् ज्ञापयामः।

पुस्तकस्य निर्माणे येषां कवीनां रचनाकाराणां च कृतयः सङ्कलिताः सन्ति तेभ्यः विद्वद्भ्यः परिषदियं हार्दं कार्तज्ञ्यं निवेदयति। अस्मिन् पुस्तके संस्कृत-संवर्धन-प्रतिष्ठानं, नवदेहली <www.samskritpromotion.in>, तथा च <https://en.rattibha.com/thread/1829313532015583599> इत्यनयोः कासाञ्चन सामग्रीणां चित्राणां च संग्रहः कृतः। तदर्थम् उभयोः कृते कार्तज्ञ्यं निवेद्यते।

डॉ. विजयपालः शास्त्री (*आचार्यः*, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः) डॉ. कालीप्रसन्नः शतपथी (दिव्यजीवनसंघः, केन्द्रापडा, ओडिशा), डॉ. विपिनविहारी शतपथी (रेभेन्सा कलिजिएट् विद्यालय, कटकम्, ओडिशा) डॉ. वीरेन्द्रकुमारः पाठकः (शिक्षा-निदेशालयः, देहली-सर्वकारः, नव-देहली), इत्येतेषां विदुषाम् अमूल्य-मार्गदर्शनाय सादरं कार्तज्ञ्यं निवेदयामः।

*योजना-कार्यालय-सदस्यः* नवनीतः गणेशः, *वरिष्ठशोध-सहायकः* श्रीबालमुकुन्दः एवञ्च *कनिष्ठपरियोजनाध्येतारः* डॉ. देवेशः शर्मा, डॉ. अङ्कितसिंहः यादवः, डॉ. गोविन्ददासः, निमेशकुमारः सिंहः, प्रज्ञा आर्या, विशालः त्यागी च पुस्तकनिर्माण-प्रक्रियायां यथायोग्यं सहयोगं दत्तवन्तः, अतः ते साधुवादार्हाः सन्ति।

अस्य पुस्तकस्य अन्तिमं रूपं प्रदातुं प्रकाशन-प्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *संपादकं (संविदा)* अतुलमिश्रां प्रति तथा च प्रकाशन-विभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* पवनकुमार-बरियारं प्रति धन्यवादं प्रकटयामः। रा.शै.अ.प्र.प. इत्यस्य प्रकाशन-प्रभागे *संविदारूपेण कार्यरतान् डी.टी.पी.-संचालकान्* विपनकुमार-शर्माणं, विट्टूकुमार-महतो च प्रति धन्यवादान् समर्पयामः।

© NCERT not to be republished

# राष्ट्र-गीतम्

**वन्दे मातरं, वन्दे मातरम्।**
**सुजलां सुफलां मलयज-शीतलाम्**
**शस्य-श्यामलां मातरम्,**
**वन्दे मातरम्॥**

**शुभ्र-ज्योत्स्ना-पुलकित-यामिनीम्**
**फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्**
**सुहासिनीं सुमधुर-भाषिणीम्**
**सुखदां वरदां मातरम्,**
**वन्दे मातरं, वन्दे मातरम्॥**

सत्यमेव जयते
© NCERT not to be republished

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र-चट्टोपाध्याय-महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० इति दिनाङ्के भारतस्य राष्ट्रपतिः डॉ. राजेन्द्र-प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने एकाम् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"

# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| *पुरोवाक्* | | | *iii* |
| *भूमिका* | | | *v* |
| *सरस्वतीप्रार्थना* | | | *xiv* |
| १. | प्रथमः पाठः | वन्दे भारतमातरम् | 1 |
| २. | द्वितीयः पाठः | नित्यं पिबामः सुभाषितरसम् | 15 |
| ३. | तृतीयः पाठः | मित्राय नमः | 29 |
| ४. | चतुर्थः पाठः | न लभ्यते चेत् आम्लं द्राक्षाफलम् | 39 |
| ५. | पञ्चमः पाठः | सेवा हि परमो धर्मः | 47 |
| ६. | षष्ठः पाठः | क्रीडाम वयं श्लोकान्त्याक्षरीम् | 57 |
| ७. | सप्तमः पाठः | ईशावास्यम् इदं सर्वम् | 71 |
| ८. | अष्टमः पाठः | हितं मनोहारि च दुर्लभं वचः | 85 |
| ९. | नवमः पाठः | अन्नाद् भवन्ति भूतानि | 96 |
| १०. | दशमः पाठः | दशमः कः ? | 104 |
| ११. | एकादशः पाठः | द्वीपेषु रम्यः द्वीपोऽण्डमानः | 115 |
| १२. | द्वादशः पाठः | वीराङ्गना पन्नाधाया | 127 |
| (क) | अतिरिक्तम् अध्ययनम् | वर्णमात्रा-परिचयः | 137 |
| (ख) | परिशिष्टम् १ | शब्दरूपाणि | 149 |
| (ग) | परिशिष्टम् २ | धातुरूपाणि | 156 |


© NCERT not to be republished

# सरस्वतीप्रार्थना

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना॥
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥ १॥

शुक्लां ब्रह्मविचार-सार-परमाम् आद्यां जगद्व्यापिनीम्।
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्॥
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्।
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥ २॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥ ३॥



© NCERT not to be republished

## प्रथमः पाठः

# वन्दे भारतमातरम्

0772CH01




© NCERT not to be republished

# भारतमाता

प्राचीनानि तीर्थक्षेत्राणि नगराणि,
पवित्राः नद्यः, श्रेष्ठाः पर्वतमालाः च




| | | | | | |
|---|---|---|---|---|---|
| १. अयोध्या | २. मथुरा | ३. हरिद्वारम् | ४. काशी | ५. काञ्ची | ६. अवन्तिका |
| ७. वैशाली | ८. द्वारिका | ९. पुरी | १०. गया | ११. प्रयागराजः | १२. पाटलीपुत्रम् |
| १३. विजयनगरम् | १४. इन्द्रप्रस्थम् | १५. सोमनाथः | १६. अमृतसरः | १७. अमरनाथः | १८. लामायुरुः |
| १९. वैष्णवदेवी | २०. ज्वालामुखी | २१. केदारनाथः | २२. बद्रीनाथः | २३. ज्योतिर्मठः | २४. कुरुक्षेत्रम् |
| २५. सम्मेतशिखरम् | २६. वैद्यनाथः | २७. नवद्वीपः | २८. कामाख्या | २९. तवाङ्गः | ३०.परशुरामकुण्डम् |
| ३१. सनामहिः | ३२. त्रिपुरसुन्दरी | ३३. भोरमदेवः | ३४. भद्राचलम् | ३५. श्रीशैलम् | ३६. तिरुपतिः |
| ३७. तिरुवन्नामलयः | ३८. श्रीरङ्गम् | ३९. रामेश्वरम् | ४०. कन्याकुमारी | ४१. शबरीमलयः | ४२. शृङ्गेरी |
| ४३. रजतपीठपुरम् | ४४. गोमन्तकम् | ४५. कूडलसंगमः | ४६. पाण्डुरङ्गपुरम् | ४७. भीमशङ्करः | ४८. त्र्यम्बकेश्वरम् |
| ४९. घुश्मेश्वरम् | ५०. ओङ्कारेश्वरम् | ५१. पदलिप्तपुरम् | ५२. नागेश्वरम् | ५३. अर्बुदगिरिः | ५४. अजयमेरुः |

मानचित्रं मापकानुसारं नास्ति।

not to be republished




एषा अस्माकं वत्सला भारतमाता। अहो अस्माकं भारतमातुः माहात्म्यम्! साक्षात् पर्वतराजः हिमालयः मुकुटरूपेण अस्याः मस्तके शोभते। अस्याः चरणौ प्रक्षालयति स्वयं रत्नाकरः समुद्रः। भारतभूमौ महेन्द्रः, मलयः, सह्यः, रैवतकः, विन्ध्यः, अरावलिः इत्यादयः श्रेष्ठाः पर्वताः विराजन्ते। अत्रैव गङ्गा, यमुना, सरस्वती, सिन्धुः, ब्रह्मपुत्रः, गण्डकी, महानदी, नर्मदा, गोदावरी, कृष्णा, कावेरी इत्यादयः पवित्राः नद्यः प्रवहन्ति। नद्यः अपि अस्माकं मातरः इव।

अयोध्या, मथुरा, हरिद्वारम्, काशी, काञ्ची, अवन्तिका, वैशाली, द्वारिका, पुरी, गया, प्रयागः, पाटलीपुत्रं, विजयनगरम्, इन्द्रप्रस्थं, सोमनाथः, अमृतसरः इत्यादीनि मङ्गलानि तीर्थक्षेत्राणि नगराणि च भारतभूमौ एव सुशोभन्ते। एतेषां तीर्थक्षेत्राणां धूलिं ललाटे स्थापयितुं विविधेभ्यः प्रदेशेभ्यः असंख्याः जनाः आगच्छन्ति।

भारतमातुः हस्ते विलसति त्रिवर्णयुतः राष्ट्रध्वजः। अहो अस्य शोभा! अस्मिन् राष्ट्रध्वजे केशरः, श्वेतः, हरितः च वर्णाः विराजन्ते। ध्वजस्य मध्ये सुन्दरं नीलवर्णं चक्रमपि शोभते। ध्वजे विराजमानाः वर्णाः चक्रं च विशिष्टं सन्देशं प्रयच्छन्ति।



© NCERT not to be republished



त्रिवर्णध्वजस्य ऊर्ध्वभागे विराजते केशरवर्णः। एषः वर्णः त्यागपरम्परायाः शौर्यपरम्परायाः च सूचकः अस्ति। ये भारतमातुः आजीवनं सेवां कृतवन्तः, देशस्य स्वतन्त्रतां प्राप्तुं सहर्षं स्वप्राणान् अर्पितवन्तः च, तेषां वीराणां बलिदानं सूचयति एषः वर्णः। '**जयतु सैनिकः**' इति वक्तुम् अस्मान् प्रेरयति ध्वजस्थितः अयं केशरवर्णः।

कृषकबान्धवाः अस्माकं भारतभूमिं सर्वदा स्व-स्वेदबिन्दुभिः सिञ्चन्ति। एतेषां परिश्रमेण एव भारतभूमिः हरितवर्णमयी समृद्धा सस्यश्यामला च सञ्जाता। भारतमातुः समृद्धेः एषा आभा हरितवर्णरूपेण अस्माकं राष्ट्रध्वजे विराजते। **'जयतु कृषकः'** इति वक्तुम् अस्मान् प्रेरयति ध्वजस्थितः एषः हरितवर्णः।






मध्ये स्थितः श्वेतवर्णः शान्तेः सत्यस्य च द्योतकः अस्ति। अणुशास्त्रे, सङ्गणकशास्त्रे, चिकित्साशास्त्रे, अन्तरिक्षशास्त्रे, आयुधशास्त्रे इत्यादिषु विज्ञानस्य विभिन्नेषु क्षेत्रेषु भारतीयैः वैज्ञानिकैः महत् यशः प्राप्तम् अस्ति। वैज्ञानिकानां तत् धवलं यशः धवलवर्णरूपेण राष्ट्रध्वजस्य मध्ये विलसति। भारतीयं विज्ञानं शान्तिं प्रगतिं सुरक्षां च परिपोषयति। '**जयतु वैज्ञानिकः**' इति वक्तुम् अस्मान् प्रेरयति ध्वजमध्यस्थः अयं धवलवर्णः।





ध्वजे विराजमानस्य घननीलवर्णस्य चक्रस्य नाम धर्मचक्रम् इति। अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति। एतत् चक्रं 'चलनीयं कर्तव्यपथे वै, न विरम, सततं चल' इति भावं बोधयति। सूर्यः विरामं विना नित्यं सञ्चरति। नदी कष्टानि सहमाना अपि ध्येयं प्रति नित्यं प्रवहति। इदं चक्रं 'जीवने श्रान्तेः, आलस्यस्य प्रमादस्य च स्थानं न भवतु' इति सन्देशं प्रयच्छति।

वयं सर्वेऽपि धन्याः यत् अस्यां पवित्रभूम्यां जन्म प्राप्तवन्तः। वयं पवित्रायाः भारतमातुः नित्यं वन्दनं कुर्मः अस्याः गौरववर्धनार्थं च प्रयत्नं कुर्मः। आगच्छन्तु मिलित्वा सर्वे गायामः –

**वयं बालका भारतभक्ताः**
**वयं बालिका भारतभक्ताः।**
**वयं हि सर्वे भारतभक्ताः**
**पृथ्वीं स्वर्गं जेतुं शक्ताः॥**



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| वन्दे | प्रणामं करोमि | प्रणाम करता/ती हूँ | I greet | |
| आलिङ्ग्य | आलिङ्गनं कृत्वा | आलिंगन कर के | Having embraced | |
| बहुत्र | बहुषु स्थानेषु | अनेक स्थानों पर | In many places | |
| शृणुमः | श्रवणं कुर्मः | हम सुनते हैं | We listen | |
| जिज्ञासा | ज्ञातुम् इच्छा | जानने की इच्छा | Curiosity | |
| उपन्यासम् | बृहत्कथारूपम् | उपन्यास को | Novel | |
| रम्यम् | सुन्दरम् | रमणीय | Pleasant | |
| आन्दोलने | क्रान्तौ | आन्दोलन में | In the movement | |
| वत्सला | स्नेहयुक्ता | स्नेहमयी | Loving | |
| माहात्म्यम् | महत्त्वम् | महिमा | Greatness | |
| मुकुटरूपेण | किरीटरूपेण | मुकुट रूप से | As a crown | |
| पर्वतराजः | पर्वतानां राजा | पर्वतों का राजा | The King of mountains | |
| रत्नाकरः | समुद्रः | सागर | Sea/Ocean | |
| तीर्थक्षेत्राणि | पुण्यक्षेत्राणि | तीर्थस्थल | Holy places | |
| धूलिम् | क्षितिकणम् | धूल को | Dust | |
| ललाटे | भाले | माथे पर | On the forehead | |
| विराजमानः | शोभायमानः | सुशोभित होता हुआ | Shining | |
| सूचकः | बोधकः | सूचित करने वाला | Indicator | |
| केशरवर्णः | केसरवर्णः | केसरिया रंग | Saffron colour | |
| प्राप्तुम् | लब्धुम् | पाने के लिए | To get | |
| वक्तुम् | भाषितुम् | बोलने के लिए | To speak | |
| कृषक-बान्धवाः | कृषीवल-बान्धवाः | किसान भाई | Our dear farmers | |
| स्वेदबिन्दुभिः | घर्मस्य जलकणैः | पसीने की बूँद से | By sweat-drops | |
| सिञ्चन्ति | सिञ्चनं कुर्वन्ति | सींचते हैं | Sprinkle | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| सस्यश्यामला | सस्यैः घनश्यामा | उपजों से हरी-भरी | Densely covered with flora | |
| आभा | कान्तिः | चमक | Lustre | |
| अणुशास्त्रे | परमाणुशास्त्रे | परमाणु विज्ञान में | In atomic science | |
| आयुधशास्त्रे | शस्त्रविज्ञाने | शस्त्र विज्ञान में | In science of weapons | |
| धवलम् | शुक्लम् | श्वेत | White | |
| घननीलवर्णस्य | गाढनीलवर्णस्य | गहरे नीले रंग का | Of navy-blue colour | |
| अराः | चक्रस्य यष्टिकाः | तीलियाँ | Spokes of a wheel | |
| कर्तव्यपथे | कर्तव्यस्य मार्गे | कर्तव्य मार्ग पर | On the path of duty | |
| सहमाना | सहनं कुर्वती | सहती हुई | Bearing | |
| श्रान्तेः | क्लान्तेः | थकान का | Of tiredness | |
| प्रमादस्य | अनवधानतायाः | असावधानता का | Of carelessness | |
| जेतुम् | विजयं प्राप्तुम् | जीतने के लिए | To win | |

© NCERT not to be republished

## प्राचीन-भौगोलिक-नाम्नाम् – आधुनिक-नामानि नामान्तराणि च

### प्राचीनानि तीर्थक्षेत्राणि नगराणि च

| | | | |
|---|---|---|---|
| **हरिद्वारम्** – माया / मायापुरी | **काशी** – वाराणसी | **अवन्तिका** – उज्जैनः | **इन्द्रप्रस्थम्** – देहली / दिल्ली |
| **विजयनगरम्** – हम्पे | **पाटलीपुत्रम्** – पटना | **पाण्डुरङ्गपुरम्** – पण्ढरपुरम् | **अजयमेरुः** – अजमेरः पुष्करं च |
| **घुश्मेश्वरम्** – घृष्णेश्वरम् | **गोमन्तकम्** – गोवा | **अर्बुदगिरिः** – आबू-पर्वतः / दिलवाडा | **पदलिप्तपुरम्** – पालीताणा/ पुण्डरीक-गिरिः / शत्रुञ्जय-गिरिराजः |
| **रजतपीठपुरम्** – उडुपि/ओडुप | | | |

### पवित्राः नद्यः

| | | | |
|---|---|---|---|
| **यमुना** – कालिन्दी | **परुष्णी** – रावी | **तापी** – ताप्ती | **गङ्गा** – जाह्नवी [भागीरथी / अलकनन्दा] |
| **सरयूः** – घाघरा | **चर्मण्वती** – चम्बल् | **वेत्रावती** – बेतवा | **शारदा** – काली / महाकाली |
| **शुतुद्रिः** – शतद्रुः / सतलुज् | **रेवा** – नर्मदा | **वितस्ता** – झेलम् | **गण्डकी** – नारायणी / सदानीरा |
| **शोणा** – सोन् | **गोदा** – गोदावरी | **कौशिकी** – कोसी | **चन्द्रभागा** – असिक्नी / चिनाब् |

### श्रेष्ठाः पर्वतमालाः

| | |
|---|---|
| **महेन्द्रगिरिः** – पूर्वी-घाटः पर्वतमाला | **अरावलिः** – अरावली पर्वतमाला |
| **रैवतकः** – गिरनारः पर्वतमाला | **विन्ध्याचलः** – विन्ध्यः पर्वतमाला |
| **सह्याद्रिः** – पश्चिमी-घाटः पर्वतमाला (उपरि-भागः) | **मलयाचलः** – पश्चिमी-घाटः पर्वतमाला (अधः-भागः) |



## वयम् अभ्यासं कुर्मः

१. **अधः प्रदत्तानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तरं लिखन्तु—**

(क) पर्वतराजः कः ?

(ख) समुद्रः कस्याः चरणौ प्रक्षालयति ?

(ग) त्रिवर्णयुतः ध्वजः कुत्र विलसति ?

(घ) ध्वजस्थितः केशरवर्णः अस्मान् किं वक्तुं प्रेरयति ?

(ङ) कृषकबान्धवाः भारतभूमिं कैः सिञ्चन्ति ?

(च) केषां धवलं यशः राष्ट्रध्वजस्य मध्ये विलसति ?

(छ) सूर्यः कं विना नित्यं सञ्चरति ?

२. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

(क) पवित्राः नद्यः काः?

(ख) विविधेभ्यः प्रदेशेभ्यः जनाः किमर्थम् आगच्छन्ति ?

(ग) धर्मचक्रं कं भावं बोधयति ?

(घ) कृषकबान्धवानां परिश्रमेण भारतभूमिः कथं सञ्जाता ?

(ङ) विज्ञानस्य केषु क्षेत्रेषु भारतीयैः यशः प्राप्तम् ?

(च) अन्ते सर्वे किं गीतं गायन्ति ?

© NCERT not to be republished

**३. रेखाङ्कितानि पदानि आश्रित्य उदाहरणानुसारं प्रश्ननिर्माणं कुर्वन्तु —**

यथा – अस्माकं वत्सला भारतमाता। – केषां वत्सला भारतमाता?

(क) समुद्रः भारतमातुः चरणौ प्रक्षालयति। – ..........

(ख) जनाः तीर्थक्षेत्राणां धूलिं ललाटे स्थापयन्ति। – ..........

(ग) वीराः भारतमातुः सर्वदा सेवां कृतवन्तः। – ..........

(घ) 'जयतु कृषकः' इति वक्तुम् अस्मान् प्रेरयति। – ..........

(ङ) नदी कष्टानि सहमाना प्रवहति। – ..........

(च) वयं गौरववर्धनार्थं प्रयत्नं कुर्मः। – ..........

**४. अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं रिक्तस्थानेषु रूपाणि लिखन्तु —**

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| (क) | चरणम् | चरणौ | .......... | (द्वितीया विभक्तिः) |
| (ख) | नदी | .......... | नद्यः | (प्रथमा विभक्तिः) |
| (ग) | ललाटे | .......... | .......... | (सप्तमी विभक्तिः) |
| (घ) | देशाय | .......... | .......... | (चतुर्थी विभक्तिः) |
| (ङ) | चक्रम् | .......... | चक्राणि | (प्रथमा विभक्तिः) |
| (च) | .......... | .......... | वैज्ञानिकैः | (तृतीया विभक्तिः) |
| (छ) | अहम् | .......... | .......... | (प्रथमा विभक्तिः) |
| (ज) | विज्ञानस्य | .......... | .......... | (षष्ठी विभक्तिः) |

**५. अधः प्रदत्तानि वाक्यानि पठित्वा मातृभाषायां/प्रान्तीयभाषायाम्/आङ्ग्लभाषायां वा अनुवादं कुर्वन्तु —**

(क) भारतभूमौ पवित्राः नद्यः प्रवहन्ति। – ..........

(ख) भारतस्य मस्तके हिमालयः मुकुटरूपेण शोभते। – ..........

© NCERT not to be republished

(ग) भारतभूमौ श्रेष्ठाः पर्वताः विराजन्ते। – ..................................................

(घ) राष्ट्रध्वजे केशरः, श्वेतः, हरितः च वर्णाः सन्ति। – ..................................................

(ङ) वयं भारते जन्म प्राप्तवन्तः। – ..................................................

**६. अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखन्तु—**

| | शब्दः | | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | भारतमाता | – | प्रथमाविभक्तिः | एकवचनम् |
| (ख) | नद्यः | – | .............................. | .............................. |
| (ग) | ललाटे | – | .............................. | .............................. |
| (घ) | तीर्थक्षेत्राणाम् | – | .............................. | .............................. |
| (ङ) | देशस्य | – | .............................. | .............................. |
| (च) | बलिदानम् | – | .............................. | .............................. |
| (छ) | कृषीवलबान्धवाः | – | .............................. | .............................. |
| (ज) | अस्मान् | – | .............................. | .............................. |
| (झ) | क्षेत्रेषु | – | .............................. | .............................. |

**७. पाठे प्रयुक्तानि क्रियापदानि रिक्तस्थानेषु लिखन्तु—**

| | | | |
|---|---|---|---|
| शृणुमः | .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. | .............................. |

© NCERT not to be republished

८. अधः प्रदत्तानां क्रियापदानां त्रिषु पुरुषेषु त्रिषु वचनेषु च लट्-लकारस्य रूपाणि लिखन्तु—

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | ............... | ............... |
| मध्यमपुरुषः | ............... | ............... | ............... |
| उत्तमपुरुषः | ............... | ............... | ............... |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | ............... | ............... |
| मध्यमपुरुषः | ............... | ............... | ............... |
| उत्तमपुरुषः | ............... | ............... | ............... |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ............... | ............... | ............... |
| मध्यमपुरुषः | ............... | ............... | ............... |
| उत्तमपुरुषः | ............... | ............... | इच्छामः |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ............... | ............... | आगच्छन्ति |
| मध्यमपुरुषः | ............... | ............... | ............... |
| उत्तमपुरुषः | ............... | ............... | ............... |

© NCERT not to be republished



## योग्यताविस्तरः

१. भारतस्य राष्ट्रगानस्य 'वन्दे मातरम्' इत्यस्य पूर्णं मूलस्वरूपं मिलित्वा गायामः।

### वन्दे मातरम् (मूलगीतम्)

वन्दे मातरं, वन्दे मातरम्।
सुजलां सुफलां मलयज-शीतलाम्
शस्य-श्यामलां मातरम्॥ वन्दे...॥

शुभ्र-ज्योत्स्ना-पुलकित-यामिनीम्
फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्
सुहासिनीं सुमधुर-भाषिणीम्
सुखदां वरदां मातरम्॥१॥ वन्दे...॥

कोटि-कोटि-कण्ठ-कलकल-निनाद-कराले
द्विसप्तकोटि-भुजै-र्धृतखर-करवाले
के बोले मा तुमी अबले
बहुबल-धारिणीं नमामि तारिणीम्
रिपुदल-वारिणीं मातरम्॥२॥ वन्दे...॥

तुमि विद्या, तुमि धर्म, तुमि हृदि तुमि मर्म
त्वं हि प्राणाः शरीरे
बाहु ते तुमि मा शक्ति,
हृदये तुमि मा भक्ति,
तोमारई प्रतिमा गडि मन्दिरे-मन्दिरे॥३॥ वन्दे...॥

त्वं हि दुर्गा दशप्रहरण-धारिणी
कमला कमलदल-विहारिणी
वाणी विद्यादायिनी, नमामि त्वाम्
नमामि कमलाम् अमलाम् अतुलाम्
सुजलां सुफलां मातरम्॥४॥ वन्दे...॥

श्यामलां सरलां सुस्मितां भूषिताम्
धरणीं भरणीं मातरम्॥

२. ब्रिटिशजनानां शासनकाले प्रमुखकार्यक्रमेषु तेषां राष्ट्रगीतं 'गॉड सेव द क्वीन' इति सर्वे अनिवार्यरूपेण गायन्ति स्म। तद् ज्ञात्वा बङ्किमचन्द्रवर्यः तस्य गीतस्य विकल्परूपेण भारतमातुः गौरवसूचकं 'वन्दे मातरम्' इति गीतं रचितवान्। एतद् गीतं १८८२ तमे वर्षे प्रकाशिते 'आनन्दमठ' इति ग्रन्थे वर्तते। तस्य प्रकाशनात् पूर्वमेव भारतीयाः 'वन्दे मातरं' गीतं सर्वत्र गातुम् आरब्धवन्तः। 'वन्दे मातरम्' इति गीतेन सह एतस्य इतिहासः अपि अवश्यं सर्वैः पठनीयः।



## परियोजनाकार्यम्

**१. जयतु सैनिकः, जयतु कृषकः, जयतु वैज्ञानिकः इति उद्घोषान् बृहत्फलके विलिख्य विद्यालयस्य कक्षायाः च भित्तिषु स्थापयन्तु। एतेषां मातृभाषया अनुवादं च कुर्वन्तु।**

**२. स्वप्रदेशे विद्यमानानां नदीनां पर्वतानां तीर्थक्षेत्राणां च नामानि लिखन्तु।**

**३. विरामदिनेषु मातापितृभ्यां सह कृषिक्षेत्रं गच्छन्तु। तत्र कृषिकार्यं दृष्ट्वा संस्कृतभाषया पञ्चवाक्यैः अस्य वर्णनं कुर्वन्तु अथवा चित्रं रचयन्तु।**

**४. दशानां (१०) देशभक्तानां नामसहितानि चित्राणि सङ्कलय्य A3 आकारस्य कलापत्रके (A3 size Drawing sheet) संश्लेषयन्तु।**

© NCERT not to be republished

द्वितीयः पाठः

# नित्यं पिबामः सुभाषितरसम्

0772CH02






© NCERT not to be republished

**वस्त्रेण वपुषा वाचा विद्यया विनयेन च।**
**वकारैः पञ्चभिर्युक्तो नरो भवति पूजितः ॥१॥**

**पदच्छेदः** – वस्त्रेण वपुषा वाचा विद्यया विनयेन च वकारैः पञ्चभिः युक्तः नरः भवति पूजितः।

**अन्वयः** – वस्त्रेण वपुषा वाचा विद्यया विनयेन च (इति एतैः) पञ्चभिः वकारैः युक्तः नरः पूजितः भवति।

**भावार्थः** – यः जनः समुचितानि वस्त्राणि धरति, शरीरेण स्वस्थः अस्ति, सदा सुमधुरं हितकरं च वचनं वदति, सर्वदा अध्ययने संलग्नः भवति, तथा च विनम्रतया च व्यवहरति तादृशः पञ्चभिः वकारैः – वस्त्रं वपुः वाक् विद्या विनयः – इत्येतैः युक्तः मनुष्यः लोके सम्मानं प्राप्नोति।

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥२॥**



**पदच्छेदः** – षड् दोषाः पुरुषेण इह हातव्याः भूतिम् इच्छता निद्रा तन्द्रा भयम् क्रोधः आलस्यम् दीर्घसूत्रता।

**अन्वयः** – इह भूतिम् इच्छता पुरुषेण निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता (च इत्येते) षड् दोषाः हातव्याः।

**भावार्थः** – अस्मासु निद्रादयः षड् दोषाः भवन्ति। एते अस्माकम् ऐश्वर्यस्य उन्नतेश्च अवरोधकाः भवन्ति। अतः यदि मानवः स्वजीवने धनिकः, विद्वान् वा भवितुम् इच्छति, ऐश्वर्यं वैभवं च प्राप्तुं वाञ्छति तर्हि सः अतिनिद्रां, तन्द्रां, भीतिं, क्रोधम्, आलस्यं, विलम्बेन कार्यकरणस्य प्रवृत्तिं च – एतान् षड् दोषान् परित्यजेत् ।

**अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति।**
**विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति॥३॥**



**पदच्छेदः** – अद्भिः गात्राणि शुध्यन्ति मनः सत्येन शुध्यति विद्या-तपोभ्यां भूतात्मा बुद्धिः ज्ञानेन शुध्यति।

**अन्वयः** – गात्राणि अद्भिः शुध्यन्ति। मनः सत्येन शुध्यति। भूतात्मा विद्यातपोभ्यां शुध्यति। बुद्धिः ज्ञानेन शुध्यति।



**भावार्थः** – प्रतिदिनं स्नानेन मानवस्य शरीरं स्वच्छं भवति। सत्येन मनः पवित्रं भवति। सत्यकथनेन मनसि द्वन्द्वः भीतिः च न भवति। नित्यं विद्याभ्यासेन परिश्रमेण च जीवस्य शुद्धिः भवति। ज्ञानेन च बुद्धिः निर्मला भवति। अतः मनुष्यः नित्यं स्नानं, सत्यकथनं, विद्याभ्यासं, परिश्रमं, ज्ञानार्जनं च कुर्यात्।

© NCERT not to be republished

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥४॥**

**पदच्छेदः** – उत्तरं यत् समुद्रस्य हिमाद्रेः च एव दक्षिणं वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।

**अन्वयः** – यत् समुद्रस्य उत्तरं हिमाद्रेः च दक्षिणं तद् एव भारतं नाम वर्षम्, यत्र भारती सन्ततिः (अस्ति)।

**भावार्थः** – अस्मिन् सुभाषिते सुभाषितकारः भारतस्य भौगोलिकं स्वरूपं वर्णयति। हिन्दमहासागरस्य उत्तरभागे हिमालयस्य च दक्षिणभागे यः भूभागः अस्ति, तस्य भूभागस्य नाम भारतवर्षम्। अत्रत्याः नागरिकाः भारतीयाः इति प्रसिद्धाः।

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥५॥**



**पदच्छेदः** – जलबिन्दु-निपातेन क्रमशः पूर्यते घटः सः हेतुः सर्वविद्यानां धर्मस्य च धनस्य च।

**अन्वयः** – घटः क्रमशः जलबिन्दु-निपातेन पूर्यते, सः हेतुः सर्वविद्यानां धर्मस्य च धनस्य च भवति।



**भावार्थः** – यथा निरन्तरं जलस्य बिन्दूनां पतनेन रिक्तः अपि घटः पूर्णः भवति तथैव जीवने निरन्तरम् अभ्यासेन सामान्यः अपि मानवः सर्वप्रकारकं ज्ञानं, धर्मं, धनं च लभते।

© NCERT not to be republished

**यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति।**
**तस्य दिवाकरकिरणैः नलिनीदलमिव विस्तारिता बुद्धिः ॥६॥**

**पदच्छेदः** – यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति तस्य दिवाकरकिरणैः नलिनीदलम् इव विस्तारिता बुद्धिः।

**अन्वयः** – यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति च तस्य बुद्धिः दिवाकरकिरणैः नलिनीदलम् इव विस्तारिता भवति।

**भावार्थः** – अस्माभिः आत्मविकासाय सर्वथा श्रेष्ठजनैः सह सङ्गतिः वासश्च कर्तव्यः। यतो हि यः निरन्तरं पठति (अर्थात् स्वाध्यायं करोति), लिखति, पश्यति, विविधान् प्रश्नान् करोति (स्वस्य संशयं दूरीकरोति), ज्ञानिजनानाम् आश्रये (समीपे) तिष्ठति, तस्य बुद्धिः तथैव वर्धते यथा सूर्यस्य किरणैः कमलं पूर्णतया विकसितं भवति।



**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
**तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥७॥**

**पदच्छेदः** – प्रियवाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः तस्मात् तद् एव वक्तव्यं वचने का दरिद्रता।

**अन्वयः** – सर्वे जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति, तस्मात् तदेव वक्तव्यं, वचने का दरिद्रता?

not to be republished

**भावार्थः** – मधुरभाषणेन सर्वे अपि प्राणिनः, अस्माकं सर्वाणि मित्राणि, माता, पिता, भ्राता इत्यादयः प्रसन्नाः भवन्ति। मधुरभाषणेन कापि हानिः नास्ति। अतः सर्वदा मधुरभाषणम् एव करणीयम्। मधुरभाषणे कदापि सङ्कोचः न करणीयः।



© NCERT not to be republished

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥८॥**

**पदच्छेदः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः न अस्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति।

**अन्वयः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति)। उद्यमसमः बन्धुः नास्ति, (जनः) यं (उद्यमं) कृत्वा न अवसीदति।





**भावार्थः** – आलस्यम् एव मनुष्यस्य शरीरे विद्यमानः महान् शत्रुः अस्ति। तत् एव अस्माकं कार्यस्य सम्पादने अवरोधकं भवति। परिश्रमः एव अस्माकं वास्तविकं मित्रम् अस्ति। यः परिश्रमं करोति सः कदापि दुःखं न प्राप्नोति।

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥९॥**



**पदच्छेदः** – अष्टादश-पुराणेषु व्यासस्य वचन-द्वयं परोपकारः पुण्याय पापाय परपीडनम्।

**अन्वयः** – अष्टादशपुराणेषु व्यासस्य वचनद्वयम् (अस्ति), परोपकारः पुण्याय परपीडनं पापाय (च भवति)।

**भावार्थः** – महर्षेः वेदव्यासस्य अष्टादश-पुराणानां सारः वचनद्वये अस्ति –

- परेषाम् उपकारेण पुण्यं भवति।
- परेषां पीडनेन पापं भवति इति।

अतः अस्माभिः सर्वदा परोपकारः करणीयः। अन्येषां पीडनं कदापि न करणीयम्।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| उत्थाय | उत्थानं कृत्वा | खड़े होकर | Having got up | |
| प्रेरकः | प्रेरणादायकः | प्रेरित करने वाला | One who inspires | |
| नैतिकः | सदाचारयुक्तः | नैतिक | Moral/ethical | |
| वपुषा | शरीरेण | शरीर से | By physique | |
| सम्मानम् | आदरः | आदर | Respect | |
| हातव्याः | त्यक्तव्याः | छोड़ना चाहिए | Worth discarding | |
| भूतिम् | वैभवम् | ऐश्वर्य | Prosperity | |
| तन्द्रा | अकर्मण्यता | कर्महीनता | Lassitude | |
| दीर्घसूत्रता | विलम्बकार्यप्रवृत्तिः | कार्य को आगे टालने की प्रवृत्ति | Procrastination | |
| अवरोधकाः | निवारकाः | रोकनेवाले | Barriers | |
| वाञ्छति | इच्छति | चाहता/ती है | Wants / Desires | |
| अद्भिः | जलैः | जल से | By water | |
| भूतात्मा | जीवः | प्राणी | Soul | |
| द्वन्द्वः | द्वैधीभावः | दुविधा | Dilemma | |
| वर्षम् | भूमेः विभागः | महाद्वीप का विभाग | A division of continent | |
| सन्ततिः | अपत्यम् | सन्तान | Progeny | |
| निपातेन | पतनेन | गिरने से | By falling | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| हेतुः | कारणम् | कारण | Reason | |
| परिपृच्छति | सादरं पृच्छति | विनय से पूछता/ती है | Humbly enquires | |
| उपाश्रयति | समीपम् गच्छति | पास जाता/जाती है | Approaches | |
| सङ्गतिः | संसर्गः | संग | Association | |
| तुष्यन्ति | सन्तोषम् अनुभवन्ति | संतुष्ट होते हैं | Feeling satisfied | |
| रिपुः | शत्रुः | वैरी | Enemy | |
| पुण्यम् | सत्कर्मणां फलम् | सत्कार्यों के फल | Fruits of meritorious deeds | |
| परपीडनम् | अन्येभ्यः कष्टप्रदानम् | दूसरों को पीड़ा देना | Bothering others | |



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) नरः कतिभिः वकारैः पूजितः भवति? ..............................

(ख) पुरुषेण कति दोषाः हातव्याः? ..............................

(ग) बुद्धिः केन शुध्यति? ..............................

(घ) जलबिन्दुनिपातेन क्रमशः कः पूर्यते? ..............................

(ङ) आलस्यं केषां महान् रिपुः अस्ति? ..............................

© NCERT not to be republished

२. **निम्नलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) नरः कथं पूजितो भवति ?

...........................................................................................................

(ख) पुरुषेण के दोषाः हातव्याः ?

...........................................................................................................

(ग) कस्य बुद्धिः विस्तारिता भवति ?

...........................................................................................................

(घ) किं कृत्वा मनुष्यः नावसीदति ?

...........................................................................................................

(ङ) व्यासस्य वचनद्वयं किम् ?

...........................................................................................................

३. **उदाहरणानुसारं श्लोकांशान् यथोचितं योजयन्तु —**

| | |
|---|---|
| (क) विद्यया वपुषा वाचा<br>वस्त्रेण विनयेन च। | निद्रा तन्द्रा भयं क्रोध<br>आलस्यं दीर्घसूत्रता॥ |
| (ख) षड् दोषाः पुरुषेणेह<br>हातव्या भूतिमिच्छता। | वकारैः पञ्चभिर्युक्तो नरो<br>भवति पूजितः॥ |
| (ग) अद्भिर्गात्राणि शुध्यन्ति<br>मनः सत्येन शुध्यति। | वर्षं तद् भारतं नाम भारती<br>यत्र सन्ततिः॥ |
| (घ) उत्तरं यत् समुद्रस्य<br>हिमाद्रेश्चैव दक्षिणम्। | स हेतुः सर्वविद्यानां<br>धर्मस्य च धनस्य च॥ |
| (ङ) जलबिन्दुनिपातेन<br>क्रमशः पूर्यते घटः। | विद्यातपोभ्यां भूतात्मा<br>बुद्धिर्ज्ञानेन शुध्यति॥ |

© NCERT not to be republished

**४. निम्नलिखितानां वाक्यानां समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखन्तु—**

(क) मधुरवाण्या सर्वे प्रसन्नाः भवन्ति। ..................................................

(ख) परिश्रमेण तुल्यः बान्धवः नास्ति। ..................................................

(ग) परोपकारेण मानवस्य पुण्यार्जनं भवति। ..................................................

(घ) हिन्दमहासागरात् हिमालयपर्यन्तं भारतवर्षम्। ..................................................

**५. अधोलिखितानां शब्दानाम् उदाहरणानुसारं पर्यायपदानि लिखन्तु—**

यथा – वपुः – ..........शरीरम्..........

(क) जलम् – ..................................

(ख) लोचनम् – ..................................

(ग) धनम् – ..................................

(घ) बुद्धिः – ..................................

(ङ) रिपुः – ..................................



© NCERT not to be republished

## अत्र इदम् अवधेयम्

**तृतीयाविभक्तेः शब्दरूपाणि उच्चैः पठन्तु स्मरन्तु च**



| | शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पुंलिङ्गशब्दाः | छात्र | छात्रेण | छात्राभ्याम् | छात्रैः |
| | शिक्षक | शिक्षकेण | शिक्षकाभ्याम् | शिक्षकैः |
| स्त्रीलिङ्गशब्दाः | विद्या | विद्यया | विद्याभ्याम् | विद्याभिः |
| | छात्रा | छात्रया | छात्राभ्याम् | छात्राभिः |
| नपुंसकलिङ्गशब्दाः | सत्य | सत्येन | सत्याभ्याम् | सत्यैः |
| | ज्ञान | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| | किम् | केन | काभ्याम् | कैः |

## ६. अधः रिक्तस्थानानि तृतीयाविभक्तेः समुचितरूपैः पूरयन्तु —

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सुधाखण्डेन | सुधाखण्डाभ्याम् | सुधाखण्डैः |
| वृक्षेण | ................................... | ................................... |
| ................................... | लताभ्याम् | लताभिः |
| ................................... | देशाभ्याम् | देशैः |
| पुण्येन | ................................... | ................................... |
| ................................... | ................................... | विनयैः |

## ७. कोष्ठके पदानि विलिख्य सुभाषितं पूरयन्तु —

| | | | | |
|---|---|---|---|---|
| उत्तरम् | यत् | ...................... | हिमाद्रेश्चैव | ...................... |
| ...................... | तद्भारतं | ...................... | भारती यत्र | ...................... |
| ............................................. | | सर्वे | तुष्यन्ति | ...................... |
| तस्मात् | ...................... | वक्तव्यम् | वचने का | ...................... |

## ८. उपर्युक्तानि सुभाषितानि पठित्वा रिक्तस्थानानि पूरयन्तु —

(क) आलस्यं हि मनुष्याणां शरीरस्थो ........................................ रिपुः।

(ख) ........................................ वचने का दरिद्रता।

(ग) यः पठति लिखति पृच्छति ........................................ ।

(घ) स हेतुः सर्वविद्यानां ........................................ धनस्य च।

(ङ) ........................................ बुद्धिर्ज्ञानेन शुध्यति।

© NCERT not to be republished

## योग्यताविस्तरः

### पर्यायपदानि (अमरकोशः)

वपुः – गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥

नराः – मनुष्याः मानुषाः मर्त्याः मनुजाः मानवाः नराः ॥

भूतिः – विभूतिर्भूतिरैश्वर्यम् (विभूतिः भूतिः ऐश्वर्यम्) ॥

मनः – चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥

बुद्धिः – बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपत्-ज्ञप्तिचेतनाः ॥

धनम् – द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥

पण्डितः – विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥

दिवाकरः – सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।
भास्कराहस्करब्रध्नः प्रभाकरविभाकराः ॥

जन्तुः – प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः।
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ॥

रिपुः – रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥

© NCERT not to be republished

## परियोजनाकार्यम्

१. 'शुध्' इति धातोः लट्-लकारस्य रूपाणि स्फोरकपत्रे लिखित्वा आनयन्तु।
२. सुभाषितेषु आगतानि तृतीयाविभक्तिरूपाणि संगृह्य उत्तरपुस्तिकायां लिखन्तु। तेषां प्रयोगं कृत्वा वाक्यानि अपि लिखन्तु।




## कार्यकलापः

'सुभाषितकण्ठपाठविषये' एकां प्रतियोगितां वर्गे, कक्षायां, विद्यालये च आयोजयन्तु।

© NCERT not to be republished

# तृतीयः पाठः

# मित्राय नमः

0772CH03




(सर्वे उत्साहेन योगशिक्षिकायाः समीपं गच्छन्ति)




छात्राः – नमो नमः आचार्ये !

आचार्या – शुभं भवतु। उपविशन्तु सर्वे।

छात्राः – आचार्ये ! किम् अद्य भवान् अस्मान् योगासनं शिक्षयति ?

आचार्या – निश्चयेन, वदन्तु किम् आसनं शिक्षितुम् इच्छन्ति ?

योगिता – आचार्ये ! अद्य सूर्यनमस्कारं शिक्षयतु।

आचार्या – समीचीनम्। सूर्यनमस्कारः द्वादशानाम् आसनानां समाहारः अस्ति। प्रत्येकस्मात् सूर्यनमस्कारात् पूर्वम् एकः मन्त्रः भवति। तेषु प्रथमः मन्त्रः अस्ति – 'ॐ मित्राय नमः' इति।

छात्राः – आम् महोदये ! वयं स्मरामः ......।







© NCERT not to be republished



**आचार्या** – अत्युत्तमम्! मिलित्वा वदन्तु।

**छात्राः** – ॐ मित्राय नमः। ॐ रवये नमः। ॐ सूर्याय नमः।
ॐ भानवे नमः। ॐ खगाय नमः। ॐ पूष्णे नमः।
ॐ हिरण्यगर्भाय नमः। ॐ मरीचये नमः। ॐ आदित्याय नमः।
ॐ सवित्रे नमः। ॐ अर्काय नमः। ॐ भास्कराय नमः।
*(सर्वान्ते)* ॐ सवितृसूर्यनारायणाय नमः।

**आचार्या** – अत्युत्तमम्। इदानीम् एकेन श्लोकेन सूर्यनमस्कारस्य बहूनि प्रयोजनानि वदामि। भवन्तः शृण्वन्तु अनुवदन्तु च।

**आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।**
**आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते॥**

एवं योगासनेषु सूर्यनमस्कारः एकः श्रेष्ठः आसनक्रमः अस्ति। सूर्यनमस्कारेण शारीरिकं, मानसिकम्, आध्यात्मिकं च बलं वर्धते। अतः वयं प्रतिदिनं सूर्यनमस्कारं करवाम। 'स्वस्थं शरीरं स्वस्थं मनः' च प्राप्नवाम। अस्तु, पुनः अग्रिमकक्षायाम् अन्येषाम् आसनानां विषये ज्ञास्यामः।

**छात्राः** – धन्यवादाः आचार्ये!




© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| अनुवदन्तु | पश्चात् उच्चारणं कुर्वन्तु | दोहराएँ | Repeat | |
| अग्रिम-कक्षायाम् | आगामिनि वर्गे | अगली कक्षा में | In the next class | |
| प्रज्ञा | मेधा | बुद्धि | Intelligence/Wisdom | |
| वीर्यम् | पराक्रमः | वीरता | Vigour | |
| तेजः | दीप्तिः | कान्ति | Brilliance | |
| आध्यात्मिकम् | अध्यात्म-विषयकम् | आध्यात्मिक | Spiritual | |
| स्वस्थम् | नीरोगम् | स्वस्थ | Healthy | |
| मित्रः, खगः, पूषा, रविः, भानुः, हिरण्यगर्भः, मरीचिः, सविता, अर्कः, भास्करः | सूर्यः | सूरज | Sun | |



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) शुभं भवतु इति कः वदति? – ..................................................

(ख) योगिता आचार्यां 'किं शिक्षयतु' इति वदति? – ..................................................

(ग) सूर्यनमस्कारः कतीनाम् आसनानां समाहारः अस्ति? – ..................................................

(घ) केषु सूर्यनमस्कारः श्रेष्ठः? – ..................................................

(ङ) सूर्यनमस्कारेण जनाः कीदृशं शरीरं प्राप्नुवन्ति? – ..................................................

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) सर्वे छात्राः आचार्यां किं पृच्छन्ति?

..................................................................................................................

(ख) सूर्यनमस्कारः इत्यनेन कः आशयः?

..................................................................................................................

(ग) आचार्या कं श्लोकं पाठयति?

..................................................................................................................

© NCERT not to be republished

(घ) सूर्यनमस्कारस्य प्रथमः मन्त्रः कः ?

..........................................................................................

(ङ) सूर्यनमस्कारेण कीदृशं बलं वर्धते ?

..........................................................................................

३. **पाठात् समुचितं पदं चित्वा अधः रिक्तस्थानानि पूरयन्तु —**

(क) प्रत्येकस्मात् .................................... पूर्वम् एकः मन्त्रः भवति।

(ख) वयं प्रतिदिनं .................................... करवाम।

(ग) स्वस्थं .................................... स्वस्थं .................................... च प्राप्नवाम।

(घ) एकेन .................................... सूर्यनमस्कारस्य बहूनि प्रयोजनानि वदामि।

(ङ) आदित्यस्य .................................... ये कुर्वन्ति दिने दिने।

**अधोलिखितानि शब्दरूपाणि पठन्तु अवगच्छन्तु च।**

| लिङ्गम् | शब्दः | चतुर्थी विभक्तिरूपाणि | | |
|---|---|---|---|---|
| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| अकारान्त-पुंलिङ्गम् | छात्र | छात्राय | छात्राभ्याम् | छात्रेभ्यः |
| | नायक | नायकाय | नायकाभ्याम् | नायकेभ्यः |
| | आदित्य | आदित्याय | आदित्याभ्याम् | आदित्येभ्यः |
| आकारान्त-स्त्रीलिङ्गम् | आचार्या | आचार्यायै | आचार्याभ्याम् | आचार्याभ्यः |
| | योगिता | योगितायै | योगिताभ्याम् | योगिताभ्यः |
| | बालिका | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |
| ईकारान्त-स्त्रीलिङ्गम् | शालिनी | शालिन्यै | शालिनीभ्याम् | शालिनीभ्यः |
| | नदी | नद्यै | नदीभ्याम् | नदीभ्यः |
| | भगिनी | भगिन्यै | भगिनीभ्याम् | भगिनीभ्यः |
| अकारान्त-नपुंसकलिङ्गम् | आसन | आसनाय | आसनाभ्याम् | आसनेभ्यः |
| | भोजन | भोजनाय | भोजनाभ्याम् | भोजनेभ्यः |
| | फल | फलाय | फलाभ्याम् | फलेभ्यः |

© NCERT not to be republished

### अत्र इदम् अवधेयम्

'नमः' शब्दस्य योगे चतुर्थी विभक्तिः भवति। यथा – भास्कराय नमः।

४. **पाठे विद्यमानानां 'नमः' युक्तशब्दानां सङ्ग्रहं कृत्वा लिखन्तु—**

यथा – ............मित्राय नमः।............

(क) ..................................................

(ख) ..................................................

(ग) ..................................................

(घ) ..................................................

(ङ) ..................................................

(च) ..................................................

(छ) ..................................................

(ज) ..................................................

(झ) ..................................................

(ञ) ..................................................

(ट) ..................................................



५. **उदाहरणानुसारं कोष्ठकात् पदानि स्वीकृत्य वाक्यानि रचयन्तु—**

अग्निः, आचार्या , त्रिवर्णध्वजः, जनकः, वृक्षः, देवी,
भगिनी, मातामही, जननी, पृथिवी, नदी

यथा – ............अग्नये नमः।............

(क) ..................................................

(ख) ..................................................

© NCERT not to be republished

(ग) ..........................................

(घ) ..........................................

(ङ) ..........................................

(च) ..........................................

(छ) ..........................................

(ज) ..........................................

(झ) ..........................................

(ञ) ..........................................



**अत्र इदम् अवधेयम्**

दानार्थे (दा-धातोः तथा च यच्छ्-धातोः योगे) चतुर्थी-विभक्तेः प्रयोगः भवति।

यथा – शिक्षकः छात्राय पुस्तकं ददाति।

शिक्षकः छात्राय पुस्तकं यच्छति।

**६. कोष्ठके विद्यमानानां शब्दानां चतुर्थी-विभक्तेः रूपाणि प्रयुज्य वाक्यानि पुनः लिखन्तु—**

यथा – सैनिकः (देश) जीवनं प्रयच्छति। ......सैनिकः देशाय जीवनं प्रयच्छति।......

(क) माता (याचक) वस्त्रं ददाति। ..........................................

(ख) पौत्रः (पितामही) औषधं ददाति। ..........................................

(ग) अहं (भगिनी) उपायनं ददामि। ..........................................

(घ) पिता (सेविका) वेतनं ददाति। ..........................................

(ङ) त्वं (मित्र) पुष्पं ददासि। ..........................................

(च) देवः (भक्त) आशीर्वादं ददाति। ..........................................

(छ) आरक्षकः (चोर) दण्डं ददाति। ..........................................

© NCERT not to be republished

**७. उदाहरणानुसारं माता कस्मै/कस्यै धनं ददाति इति कोष्ठके विद्यमानानि पदानि उपयुज्य लिखन्तु —**




(क) – ......माता पुत्र्यै धनं ददाति।......

(ख) – ................................................

(ग) – ................................................

(घ) – ................................................

(ङ) – ................................................

(च) – ................................................

**८. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु —**

| | | | | |
|---|---|---|---|---|
| यथा – गणेश | – | गणेशाय | गणेशाभ्याम् | गणेशेभ्यः |
| (क) भक्त | – | भक्ताय | .................... | भक्तेभ्यः |
| (ख) सेविका | – | .................... | सेविकाभ्याम् | .................... |
| (ग) अनुजा | – | अनुजायै | .................... | .................... |
| (घ) गृहिणी | – | .................... | गृहिणीभ्याम् | .................... |
| (ङ) कुमारी | – | कुमार्यै | कुमारीभ्याम् | .................... |
| (च) वन | – | वनाय | .................... | .................... |
| (छ) मित्र | – | .................... | .................... | मित्रेभ्यः |

© NCERT not to be republished

## योग्यताविस्तरः

- विश्वयोगदिवसः — जगति सर्वे जनाः जूनमासस्य २१तमं दिनाङ्कं विश्वयोगदिवसरूपेण आचरन्ति।
- योगसूत्रम् — अस्य प्रणेता महर्षिः पतञ्जलिः अस्ति। अस्मिन् ग्रन्थे १९६ सूत्राणि सन्ति। शरीरस्य मनसः च स्वास्थ्यसम्बद्धाः विषयाः अत्र विद्यन्ते।
- हठयोगप्रदीपिका — एषः ग्रन्थः 'स्वात्माराम'-स्वामिना विरचितः। अस्मिन् ग्रन्थे विविधानाम् आसनानां विवरणं लभ्यते। तेषु कानिचन आसनानि अधः प्रदर्शितानि। यथा –



वज्रासनम्



पद्मासनम्



पश्चिमोत्तानासनम्



हलासनम्



ताडासनम्

© NCERT not to be republished

उच्चैः पठन्तु अवगच्छन्तु च।

**दा-धातुः (परस्मैपदम्), लट्-लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददाति | दत्तः | ददति |
| मध्यमपुरुषः | ददासि | दत्थः | दत्थ |
| उत्तमपुरुषः | ददामि | दद्वः | दद्मः |

**दा-धातुः (परस्मैपदम्), लोट्-लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददातु | दत्ताम् | ददतु |
| मध्यमपुरुषः | देहि | दत्तम् | दत्त |
| उत्तमपुरुषः | ददानि | ददाव | ददाम |



## परियोजनाकार्यम्

१. सूर्यनमस्कारस्य द्वादशानाम् आसनानां भित्तिपत्राणि रचयन्तु। मन्त्रान् अपि लिखन्तु।

२. प्रतिदिनं सकुटुम्बं सूर्यनमस्कारस्य अभ्यासं कुर्वन्तु।

३. विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥
अस्मिन् श्लोके विद्यमानानि चतुर्थी-विभक्त्यन्तरूपाणि चित्वा लिखन्तु।

© NCERT not to be republished

चतुर्थः पाठः

# न लभ्यते चेत् आम्लं द्राक्षाफलम्





एकः शृगालः

एकः शृगालः वनं गच्छति।
पिपासा, तस्य बुभुक्षा
पिपासया बुभुक्षया वनं गच्छति
सः वनं गच्छति, सः वनं गच्छति।
तत्र गच्छति, किमपि न लभते
इतोऽपि गच्छति, किमपि न लभते
श्रान्तः जायते, खिन्नः जायते
सः श्रान्तः जायते, खिन्नः जायते
किं च करोति? सः किं च करोति?

वामतः पश्यति, दक्षिणतः पश्यति
अग्रतः पश्यति, पृष्ठतः पश्यति
स्वेदः जायते, तृषा जायते
तस्य स्वेदः जायते, तृषा जायते
किं च पश्यति? सः किं च पश्यति?
किं च पश्यति? सः किं च पश्यति?

© NCERT not to be republished



पश्यति द्राक्षालतां
सः पश्यति द्राक्षाफलम्
उपरि उपरि लतासु दृश्यते च तत्फलम्
अनुक्षणं तन्मुखे रसः जायते
किं च करोति ? सः किं च करोति ?

एकवारम् उत्पतति, द्विवारम् उत्पतति
त्रिवारम् उत्पतति, पुनः पुनः उत्पतति
स्वेदः जायते, तस्य श्रमः जायते
किं कथयति ? सः किं कथयति ?

आम्लं द्राक्षाफलम् आम्लं द्राक्षाफलम्
इत्येवं कथयति, सः पलायते
इत्येवं कथयति, सः पलायते ॥



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| शृगालः | लोमशा | लोमड़ी | Fox | |
| वनम् | काननम् | अरण्य | Forest | |
| पिपासा | पातुम् इच्छा | प्यास | Thirst | |
| बुभुक्षा | भोक्तुम् इच्छा | भूख | Hunger | |
| किमपि | यत् किञ्चित् | कुछ भी | Anything | |
| इतोऽपि | अतः परम् अपि | और भी | More than this | |
| लभते | प्राप्नोति | पाता है | Gets | |
| श्रान्तः | क्लान्तः | थका हुआ | Tired | |
| खिन्नः | दुःखितः | खेद से युक्त | Sad | |
| जायते | भवति | होता है | Becomes | |
| वामतः | वामभागे | बायीं ओर | Towards left | |
| दक्षिणतः | दक्षिणभागे | दाहिनी ओर | Towards right | |
| अग्रतः | अग्रभागे | आगे | In front | |
| पृष्ठतः | पृष्ठभागे | पीछे | Behind | |
| स्वेदः | घर्मः | पसीना | Sweat | |
| तृषा | पिपासा | प्यास | Thirst | |
| द्राक्षालताम् | द्राक्षाफलस्य वल्लीम् | अंगूर की बेल को | Grape-vine climber | |
| उपरि | ऊर्ध्वभागे | ऊपर | Above | |
| दृश्यते | अवलोक्यते | देखा जाता है | Seen | |
| अनुक्षणम् | क्षणाभ्यन्तरे | उसी क्षण | Immediately | |
| रसः | लालारसः / मुखस्रावः | लार | Saliva | |
| एकवारम् | सकृत् | एक बार | Once | |
| द्विवारम् | वारद्वयम् / द्विः | दो बार | Twice | |
| उत्पतति | कूर्दते | कूदता है | Jumps | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| पुनः पुनः | भूयो भूयः | बार-बार | Frequently | |
| कथयति | वदति | कहता है | Tells | |
| आम्लम् | आम्लरसयुक्तम् | खट्टा | Sour | |
| द्राक्षाफलम् | मृद्वीकाफलम् | अंगूर | Grapes | |
| पलायते | अन्यत्र धावति | भाग जाता है | Runs away | |



## वयम् अभ्यासं कुर्मः

१. **एकः शृगालः इति गीतस्य साभिनयं कक्षायां गानं कुर्वन्तु।**

२. **अधः प्रदत्तानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तरं लिखन्तु —**

(क) कः वनं गच्छति? ..............................

(ख) शृगालः कां पश्यति? ..............................

(ग) शृगालस्य मुखे किं जायते? ..............................

(घ) शृगालः किं पश्यति? ..............................

(ङ) द्राक्षाफलं कुत्र दृश्यते? ..............................

(च) किं शृगालः पुनः पुनः उत्पतति? .............................. (आम्/न)

(छ) किं शृगालः द्राक्षाफलं प्राप्नोति? .............................. (आम्/न)

३. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु —**

(क) शृगालः कथं वनं गच्छति? ..............................

(ख) वनं गत्वा शृगालस्य किं जायते? ..............................

(ग) शृगालः द्राक्षाफलं कुत्र पश्यति? ..............................

© NCERT not to be republished

(घ) द्राक्षाफलं दृष्ट्वा कस्य मुखे रसः जायते? ........................................

(ङ) अन्ते शृगालः किं वदति? ........................................

**अत्र इदम् अवधेयम्**

- अस्मिन् पाठे जायते, लभते, पलायते इति एतादृशानि क्रियापदानि सन्ति।
- एतादृशानां क्रियापदानां रूपाणि लट्-लकारे कथं भवन्ति इति पश्यामः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | लभते | लभेते | लभन्ते |
| मध्यमः पुरुषः | लभसे | लभेथे | लभध्वे |
| प्रथमः पुरुषः | लभे | लभावहे | लभामहे |

**४. उपरि प्रदत्तां मञ्जूषां दृष्ट्वा रिक्तस्थानेषु उचितक्रियापदानि लिखन्तु—**

(क)

| | | |
|---|---|---|
| वन्दते | .................... | .................... |
| .................... | वन्देथे | .................... |
| .................... | .................... | वन्दामहे |

(ख)

| | | |
|---|---|---|
| पलायते | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

(ग)

| | | |
|---|---|---|
| जायते | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

**५. उदाहरणानुसारम् एकवचनरूपं दृष्ट्वा द्विवचन-बहुवचनरूपाणि लिखन्तु—**

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कम्प् | कम्पते | कम्पेते | कम्पन्ते |
| वर्ध् | वर्धते | .................... | .................... |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| वर्त् | वर्तसे | ..................... | ..................... |
| प्र + काश् | प्रकाशते | ..................... | ..................... |
| वन्द् | वन्दे | ..................... | ..................... |
| याच् | याचते | ..................... | ..................... |
| लज्ज् | लज्जसे | ..................... | ..................... |
| वीक्ष् | वीक्षते | ..................... | ..................... |
| सेव् | सेवे | ..................... | ..................... |
| वन्द् | वन्दसे | ..................... | ..................... |
| शुभ् | शोभते | ..................... | ..................... |

**६. उदाहरणानुसारं वाक्यद्वयं लिखन्तु —**

यथा – शत्रुः (पलाय्) ....शत्रुः पलायते.... चोराः (पलाय्) ....चोराः पलायन्ते....

(क) वृक्षः (वर्ध्) .................................. बालाः (वर्ध्) ..................................

(ख) छात्रः (वन्द्) .................................. भक्ताः (वन्द्) ..................................

(ग) वैद्यः (वीक्ष्) .................................. प्रेक्षकाः (वीक्ष्) ..................................

(घ) कर्मचारी (सेव्) .................................. महिलाः (सेव्) ..................................

(ङ) वृक्षः (कम्प्) .................................. रुग्णाः (कम्प्) ..................................

**७. उदाहरणं दृष्ट्वा वाक्यानि उचितरूपैः पूरयन्तु —**

(क) शुनकं दृष्ट्वा बालकस्य भयं (जाय्) ........शुनकं दृष्ट्वा बालकस्य भयं जायते........

(ख) मूषकः मार्जारं दृष्ट्वा (पलाय्) ..................................................................

(ग) रात्रिकाले मार्गदीपाः (प्रकाश्) ..................................................................

(घ) अहं देवं (वन्द्) ..................................................................

(ङ) त्वं किमर्थं (लज्ज्) ..................................................................

(च) वयं देशं (सेव्) ..................................................................

© NCERT not to be republished

## योग्यताविस्तरः

**श्लोकान् उच्चैः पठन्तु, अर्थम् अवगच्छन्तु च।**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजनाः न परित्यजन्ति॥१॥

गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥२॥

## परियोजनाकार्यम्

**त्वं जीवने कदाचित् अभीष्टं वस्तु न लभसे। कदाचित् तव लक्ष्यपूर्तिः न भवति। तदा त्वं किं करोषि, किं च चिन्तयसि इति संस्कृतभाषया/स्वभाषया प्रसङ्गसहितं लिख।**

## कार्यकलापः

मुखेन द्राक्षाफलस्य ग्रहणम् – इति क्रीडां कारयामः। उपरि रज्ज्वा फलस्य मधुरस्य वा बन्धनं कृत्वा तस्याः आकर्षण-शिथिलीकरणैः अध्यापकः क्रीडाङ्गणे क्रीडां कारयति। छात्राः मुखस्य साहाय्येन ग्रहीतुं प्रयत्नं कुर्वन्ति।



© NCERT not to be republished

## पञ्चमः पाठः

# सेवा हि परमो धर्मः

0772CH05




सत्यं, करुणा, उदारता, सेवा, परोपकारः,
अक्रोधः इत्यादयः मानवीयाः गुणाः सन्ति।
अद्य एतैः गुणैः सम्बद्धाम् एकां कथां पठामः।
आम्, मान्ये ! वयम् अपि
पठितुम् इच्छामः।

नागार्जुनः प्रसिद्धः रसायनशास्त्रज्ञः चिकित्सकः च आसीत्। सः अहोरात्रं प्रयोगशालायां कार्यं करोति स्म। एकदा सः महाराजं निवेदितवान् – “महाराज! मम चिकित्साकार्याय एकः सहायकः आवश्यकः” इति। राजा एतद् अङ्गीकृतवान् उक्तवान् च – ‘अस्तु, अहं व्यवस्थां करोमि। श्वः केचन योग्याः युवकाः आगमिष्यन्ति। भवान् परीक्षां कृत्वा तेषु युवकेषु कमपि योग्यं स्वीकरोतु’ इति।



अन्यस्मिन् दिने द्वौ युवकौ आगतवन्तौ। नागार्जुनः द्वयोः विद्याभ्यासविषये पृष्टवान्। द्वयोः अपि विद्याभ्यासविषयः समानः एव आसीत्। तदा नागार्जुनः तौ एकं विशिष्टं रसायनं निर्माय आगच्छताम् इति सूचितवान्। तदर्थं दिनद्वयस्य अवसरं दत्तवान्। “गमनसमये राजमार्गेण गच्छताम्” इत्यपि सूचितवान्।

दिनद्वयानन्तरं नागार्जुनस्य समीपे प्रथमः युवकः आगतवान्। “औषधनिर्माणे किमपि कष्टं न अभवत् खलु?” इति नागार्जुनः पृष्टवान्। युवकः स्वनिष्ठां दर्शयितुं स्वगृहस्य समस्याः वर्णितवान् – “पितुः उदरवेदना, मातुः ज्वरः च आसीत्। तथापि अहं तत्सर्वं परित्यज्य औषधं निर्मितवान्” इति उक्त्वा नागार्जुनाय रसायनं दत्तवान्।



तदभ्यन्तरे द्वितीयः युवकः अपि आगतवान्। सः खिन्नः आसीत्। तमपि नागार्जुनः पृष्टवान्। तदा युवकः उक्तवान् "अहम् औषधं निर्मातुं न शक्तवान्" इति। "किमर्थं न शक्तवान्?" इति नागार्जुनः पृच्छति। युवकः उक्तवान् – "राजमार्गे अहं कञ्चित् रोगिणं दृष्टवान्।



तस्य परिस्थितिः शोचनीया आसीत्। अहं तं स्वगृहं नीतवान्। दिनद्वयं तस्य एव सेवायां निरतः आसम्। अद्य प्रातः सः स्वस्थः अभवत्। अहं ततः साक्षात् अत्र आगतवान्। रसायननिर्माणार्थं समयम् एव न प्राप्तवान्" इति।



© NCERT not to be republished

तदनन्तरं नागार्जुनः द्वितीयं युवकं सहायकत्वेन स्वीकृतवान्। राजा एतं वृत्तान्तं श्रुत्वा आश्चर्यं प्रकटितवान्। सः नागार्जुनं पृष्टवान् – "प्रथमः युवकः औषधं कृत्वा आनीतवान्। द्वितीयः तथा न कृतवान्। तथापि भवान् किमर्थं द्वितीयं चितवान्"?

नागार्जुनः अवदत् – "द्वितीयः अपि औषधनिर्माणे कुशलः अस्ति। किन्तु तेन समयः न प्राप्तः। यतः सः सेवायां निरतः आसीत्। तं रोगिणम् अहं पूर्वमेव मार्गे दृष्टवान्। अतः 'राजमार्गेण गन्तव्यम्' इति अहं युवकद्वयं सूचितवान्। प्रथमः रोगिणं दृष्ट्वा अपि अग्रे गतवान्। सः यन्त्रवत् कार्यं करोति। तस्मिन् सेवायाः भावना नास्ति। सेवाभावनां विना चिकित्सकः कथं भवेत्? अतः अहं द्वितीयस्य चयनं कृतवान्" इति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| उपाधिम् | नामचिह्नम् | उपाधि को | Degree | |
| पदवीम् | पदनाम | पदवी | Designation/ Position | |
| मानवीयाः | मानवे भवितव्याः | मानवों में होने वाले | Humane | |
| रसायनशास्त्रज्ञः | यः औषधशास्त्रं जानाति | रसायन शास्त्र का विशेषज्ञ | Chemist & Druggist | |
| चिकित्सकः | भिषक् | वैद्य | Physician | |
| प्रयोगशालायाम् | अनुसन्धान-परीक्षण-कक्षे | प्रयोगशाला में | In the laboratory | |
| अङ्गीकृतवान् | स्वीकृतवान् | स्वीकार किया | Accepted | |
| व्यवस्थाम् | प्रबन्धनम् | व्यवस्था को | Arrangement | |
| अन्यस्मिन् दिने | अपरस्मिन् दिवसे | अगले दिन | On another day | |
| राजमार्गः | मुख्यमार्गः | राजमार्ग | Highway | |
| खिन्नः | दुःखितः | दुःखी | Sad | |
| (अहम्) शक्तवान् | समर्थः अभवम् | (मैं) कर सका | (I) could do | |
| रोगिणम् | अस्वस्थम् | रोगी को | For sick person | |
| शोचनीया | दयनीया | दुःखदायी | Miserable | |
| निरतः | लीनः | मग्न | Engrossed | |
| वृत्तान्तम् | घटनाम् | प्रसङ्ग को | Anecdote | |
| चितवान् | चयनं कृतवान् | चुना | Selected | |
| यन्त्रवत् | यन्त्रम् इव | यन्त्र की भाँति | Like a machine | |
| कषायम् | क्वाथम् | काढ़ा को | Herbal decoction | |

© NCERT not to be republished

### अत्र इदम् अवधेयम्

- 'रसायनम्' इति शब्दः आयुर्वेदशास्त्रे 'औषधम्' इत्यस्मिन् विषये प्रयुज्यते।
- 'क्तवतु'-प्रत्ययस्य प्रयोगः भूतकालार्थे अपि भवति।

| | | | |
|---|---|---|---|
| पठ् + क्तवतु = | (पुंलिङ्गे) | पठितवान् (एकवचनम्) | पठितवन्तः (बहुवचनम्) |
| | (स्त्रीलिङ्गे) | पठितवती (एकवचनम्) | पठितवत्यः (बहुवचनम्) |

| | | |
|---|---|---|
| उदाहरणानि – | सः पठितवान्। | सा पठितवती। |
| | छात्रः पठितवान्। | राधिका पठितवती। |
| | छात्राः पठितवन्तः। | बालिकाः पठितवत्यः। |
| | त्वं पठितवान्। | त्वं पठितवती। |
| | अहं पठितवान्। | अहं पठितवती। |



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तराणि लिखन्तु—**

(क) कः प्रसिद्धः चिकित्सकः आसीत्? ..........................................

(ख) अन्यस्मिन् दिवसे कौ आगतौ? ..........................................

(ग) कः खिन्नः आसीत्? ..........................................

(घ) रुग्णस्य परिस्थितिः कथम् आसीत्? ..........................................

(ङ) नागार्जुनः सहायकरूपेण कं चितवान्? ..........................................

(च) कां विना चिकित्सकः न भवति? ..........................................

(छ) नागार्जुनः युवकौ केन मार्गेण गन्तुं सूचितवान्? ..........................................

**२. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

(क) अहोरात्रं नागार्जुनः कुत्र कार्यं करोति स्म?

(ख) नागार्जुनः महाराजं किं निवेदितवान्?

(ग) प्रथमः युवकः कथं कार्यं कृतवान्?

© NCERT not to be republished

(घ) द्वितीय: युवक: राजमार्गे रोगिणं दृष्ट्वा किं कृतवान्?

(ङ) सेवाया: भावनां विना किं न भवेत्?

**३. उदाहरणानुसारम् अधोलिखितानां पदानां स्त्रीलिङ्गरूपाणि लिखन्तु—**

| | | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | पठितवान् – | पठितवती | पठितवत्य: |
| (ख) | गतवान् – | ................ | ................ |
| (ग) | लिखितवान् – | ................ | ................ |
| (घ) | खादितवान् – | ................ | ................ |
| (ङ) | क्रीडितवान् – | ................ | ................ |
| (च) | हसितवान् – | ................ | ................ |
| (छ) | निवेदितवान् – | ................ | ................ |
| (ज) | सूचितवान् – | ................ | ................ |

**४. उदाहरणानुसारम् अधोलिखितानां पदानां पुंलिङ्गरूपाणि लिखन्तु।**

| | | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | पठितवती – | पठितवान् | पठितवन्त: |
| (ख) | कृतवती – | ................ | ................ |
| (ग) | दृष्टवती – | ................ | ................ |
| (घ) | दत्तवती – | ................ | ................ |
| (ङ) | प्रक्षालितवती – | ................ | ................ |
| (च) | धावितवती – | ................ | ................ |

**५. उदाहरणानुसारं वाक्यानि परिवर्तयन्तु—**

यथा – पिता कषायं पिबति। ........ पिता कषायं पीतवान्।

अहं पुस्तकं नयामि। ........ अहं पुस्तकं नीतवान्/नीतवती।

(क) युवक: आपणं गच्छति। – ................................

© NCERT not to be republished

(ख) सः रोटिकां खादति। – ..................................................

(ग) महिला वस्त्रं ददाति। – ..................................................

(घ) बालकः द्विचक्रिकातः पतति। – ..................................................

(ङ) पितामही चलच्चित्रं पश्यति। – ..................................................

(च) अहं गृहपाठं लिखामि। – ..................................................

(छ) त्वं कुत्र गच्छसि? – ..................................................

(ज) अश्वाः वने धावन्ति। – ..................................................

(झ) बालिकाः शीघ्रम् आगच्छन्ति। – ..................................................

(ञ) वयं समुद्रतीरे पयोहिमं खादामः। – ..................................................

**अत्र इदम् अवधेयम्**

वर्तमानकाल-क्रियापदेन सह 'स्म' इति अव्ययस्य योजनेन भूतकालस्य अर्थः भवति।

यथा – सः बाल्ये पुस्तकानि पठति।

सः बाल्ये पुस्तकानि पठति स्म (अपठत्)।

© NCERT not to be republished

**६. अनुच्छेदे कोष्ठकेषु केचन धातवः दत्ताः सन्ति। उपरि दत्तम् अवधेयांशं पठित्वा 'स्म' इति अव्ययपदम् उपयुज्य अनुच्छेदं पुनः लिखन्तु।**

.................................................. (शीर्षकं लिखन्तु)

कृषकः प्रतिदिनं कृषिक्षेत्रं .................................... (गच्छ्)। जलसेचनं .................................... (कृ)। कीटानां निवारणार्थं जैवौषधं .................................... (स्थापय्)। सः कृषिकार्यं सम्यक् ............ (ज्ञा)। अतः अन्ये कृषकाः संशयेन .................................... (पृच्छ्)। सः स्वाभिमानेन ............ (जीव्)। अतः 'अहं कृषकः भूमिपुत्रः' इति साभिमानं .................................... (वद्)। सः क्षेत्रे गोमयं .................................... (योजय्), न तु कृतकान् पदार्थान्। अतः व्रीहेः गुणवत्ता अधिका .................................... (भव्)। जनाः जालपुटमाध्यमेन तस्य तण्डुलं .................................... (क्रीण्)। एवं तस्य परिवारस्य सर्वे जनाः कृषिकार्येण ससुखं .................................... (जीव्)। सः सर्वान् ............ (वद्) "कृषकः न दीनः न च दरिद्रः, परं सर्वेषां पोषकः" इति।



## योग्यताविस्तर:

### स्वास्थ्यरक्षणाय नियमा:

ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।
सर्वमेव परित्यज्य शरीरमनुपालयेत्॥
भोजनान्ते पिबेत् तक्रं वासरान्ते पिबेत्पयः।
निशान्ते च पिबेत् वारि त्रिभी रोगो न जायते॥

- भूतकाल: गतकालं ज्ञापयति।
- धातुना सह क्तवतु इति प्रत्ययस्य योजनेन अपि भूतकालार्थकानि पदानि भवन्ति।

यथा – पठ् + क्तवतु = पठितवान् (पुंलिङ्गम्) पठितवती (स्त्रीलिङ्गम्)

- वर्तमानकालक्रियापदेन सह स्म इति अव्ययपदस्य योजनेन अपि भूतकालार्थ: भवति।

यथा – गच्छति स्म – गतवान्/गतवती
लिखति स्म – लिखितवान्/लिखितवती

| धातु: | लट्-लकार: (वर्तमानकाले) | लङ्लकार: (भूतकाले) | क्तवतुप्रत्यय: पुंलिङ्गे | क्तवतुप्रत्यय: स्त्रीलिङ्गे | स्म-प्रयोग: (भूतकाले) |
|---|---|---|---|---|---|
| गम् | गच्छति | अगच्छत् | गतवान् | गतवती | गच्छति स्म |
| लिख् | लिखति | अलिखत् | लिखितवान् | लिखितवती | लिखति स्म |
| गा | गायति | अगायत् | गीतवान् | गीतवती | गायति स्म |
| पा | पिबति | अपिबत् | पीतवान् | पीतवती | पिबति स्म |
| श्रु | शृणोति | अशृणोत् | श्रुतवान् | श्रुतवती | शृणोति स्म |
| दा | ददाति | अददात् | दत्तवान् | दत्तवती | ददाति स्म |
| ज्ञा | जानाति | अजानात् | ज्ञातवान् | ज्ञातवती | जानाति स्म |
| कृ | करोति | अकरोत् | कृतवान् | कृतवती | करोति स्म |
| दृश् | पश्यति | अपश्यत् | दृष्टवान् | दृष्टवती | पश्यति स्म |
| स्था | तिष्ठति | अतिष्ठत् | स्थितवान् | स्थितवती | तिष्ठति स्म |

© NCERT not to be republished



## परियोजनाकार्यम्

१. परहितार्थं सेवारतानां प्रेरकाणां महात्मनां जीवनसम्बद्धां कथां सङ्गृह्णन्तु।

२. अस्माकं समाजे कुटुम्बे वा सेवाकार्यं कुर्वतः जनद्वयस्य विवरणं लिखन्तु।

३. भवतां परिवेशे विद्यमानानाम् आयुर्वेदीयसस्यानां पदार्थानां च नामानि लिखन्तु। तेषां स्वास्थ्यरक्षणलाभान् लिखन्तु।
यथा – बिल्वं पाचनक्रियां वर्धते। लवङ्गं दन्तसमस्याः कासं च नाशयति।

४. अधः कानिचन चित्राणि वाक्यानि च सन्ति। चित्राणि पश्यन्तु , वाक्यानि पठन्तु। इदानीम् उचितं वाक्यं चित्रेण सह योजयन्तु।

### वाक्यानि



धेनुर्माता परमशिवा



नित्यं मातापित्रोः सेवा



रोगातुराणाम् उपचारः



गृहकार्येषु भगिन्याः साहाय्यम्



परस्परं कार्यकरणे साहाय्यम्

© NCERT not to be republished

## षष्ठः पाठः

# क्रीडाम वयं श्लोकान्त्याक्षरीम्

0772CH06



| ज्ञानमालागणः | रत्नमालागणः |
|---|---|
| १. रूपयौवनसम्पन्ना विशालकुलसम्भवाः। विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥१॥ (क्) | १. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्। व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥ २ ॥ (व्) |
| २. विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय। खलस्य साधोर्विपरीतमेतत्, ज्ञानाय दानाय च रक्षणाय॥ ३॥ (य्) | २. येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः। ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति॥ ४॥ (त्) |
| ३. तदा वृत्तिश्च कीर्तिश्च लक्ष्मीर्वाणी यशस्विनी। तत्त्वज्ञानं परा शान्तिर्यदा विद्या भवेत्तव॥५॥ (व्) | ३. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः। विद्या बन्धुजनो विदेशगमने विद्या परा देवता, विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥ ६॥ (श्) |
| ४. शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम्। शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ॥७॥ (न्) | ४. न विद्यया विना सौख्यं नराणां जायते ध्रुवम्। अतो धर्मार्थमोक्षेभ्यो विद्याभ्यासं समाचरेत्॥८॥ (त्) |
| ५. ताराणां भूषणं चन्द्रः लतानां भूषणं सुमम्। पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्॥९॥(ण्/न्) | ५. न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि। व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥ १० ॥ (न्) |

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥१॥**

**पदच्छेदः** – रूप-यौवन-सम्पन्नाः विशाल-कुल-सम्भवाः विद्या-हीनाः न शोभन्ते निर्गन्धाः इव किंशुकाः।

**अन्वयः** – रूपयौवनसम्पन्नाः विशालकुलसम्भवाः (परन्तु) विद्याहीनाः (जनाः) निर्गन्धाः किंशुकाः इव न शोभन्ते।

**भावार्थः** – येषां सुन्दरं रूपम् अस्ति, यौवनम् अस्ति, उत्तमे कुले जन्म अपि प्राप्तम्, किन्तु ते यदि विद्यायाः अर्जनं न कुर्वन्ति तर्हि तेषां शोभा न भवति। यथा पुष्पिताः पलाशवृक्षाः दर्शने अतीव सुन्दराः सन्ति, किन्तु तेषु सुगन्धः न भवति। जनाः तेषाम् उपयोगं न कुर्वन्ति। अतः रूपस्य यौवनस्य उच्चकुलस्य च अपेक्षया विद्या एव श्रेष्ठा।

© NCERT not to be republished

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥२॥**



**पदच्छेद:** – काव्य-शास्त्र-विनोदेन काल: गच्छति धीमताम् व्यसनेन च मूर्खाणाम् निद्रया कलहेन वा।

**अन्वय:** – धीमतां काल: काव्यशास्त्रविनोदेन मूर्खाणां च (काल:) व्यसनेन निद्रया कलहेन वा गच्छति।

**भावार्थ:** – बुद्धिमन्त: जना: काव्यानां शास्त्राणां च अनुशीलनेन समयस्य सदुपयोगं कुर्वन्ति, परन्तु मूर्खजना: शयनं कृत्वा, परस्परं कलहं कृत्वा अथवा दुर्व्यसनेन अमूल्यसमयस्य दुरुपयोगं कुर्वन्ति, अत: वयं नित्यं विद्याभ्यासेन पठनेन लेखनेन वा समयस्य सदुपयोगं कुर्म:।

**विद्या विवादाय धनं मदाय शक्ति: परेषां परिपीडनाय।**
**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥३॥**



**पदच्छेद:** – विद्या विवादाय धनं मदाय शक्ति: परेषाम् परिपीडनाय खलस्य साधो: विपरीतम् एतत् ज्ञानाय दानाय च रक्षणाय।

**अन्वय:** – खलस्य विद्या विवादाय, धनं मदाय, शक्ति: परेषां परिपीडनाय (च भवति)। (परं) साधो: एतद्-विपरीतं (विद्या) ज्ञानाय (धनं) दानाय (शक्ति:) रक्षणाय च (भवति)।

**भावार्थ:** – दुष्ट: जन: विद्याया: उपयोगं कलहार्थं करोति। धनस्य उपयोगम् अहङ्कारार्थं करोति। सामर्थ्यस्य उपयोगम् अन्येषां पीडनार्थं च करोति, किन्तु सज्जनस्य स्वभाव: एतस्य विपरीत: भवति। स: विद्याया: उपयोगम् अन्येषां ज्ञानवर्धनार्थं करोति। धनस्य उपयोगं दानार्थं करोति। सामर्थ्यस्य उपयोगं दुर्बलानां रक्षणार्थं च करोति।

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥ ४॥**

**पदच्छेदः** – येषाम् न विद्या न तपः न दानम् ज्ञानम् न शीलम् न गुणः न धर्मः ते मर्त्य-लोके भुवि भार-भूताः मनुष्य-रूपेण मृगाः चरन्ति।

**अन्वयः** – येषां (जनानां) विद्या न, तपः न, दानं न, ज्ञानं न, शीलं न, गुणः न, धर्मः (अपि) न (अस्ति), ते मर्त्यलोके भुवि भारभूताः मृगाः मनुष्यरूपेण चरन्ति।

**भावार्थः** – ये जनाः विद्यां न अर्जयन्ति, कठिनव्रतं न आचरन्ति, दानं न कुर्वन्ति, ज्ञानं न अर्जयन्ति, उत्तमचरित्रवन्तः न भवन्ति, गुणवन्तः न सन्ति,धर्माचरणं न कुर्वन्ति, ते अस्यां भूमौ भारभूताः सन्तः पशवः इव इतस्ततः भ्रमन्ति।





**तदा वृत्तिश्च कीर्तिश्च लक्ष्मीर्वाणी यशस्विनी।**
**तत्त्वज्ञानं परा शान्तिर्यदा विद्या भवेत्तव॥ ५॥**

**पदच्छेदः** – तदा वृत्तिः च कीर्तिः च लक्ष्मीः वाणी यशस्विनी तत्त्वज्ञानम् परा शान्तिः यदा विद्या भवेत् तव।

**अन्वयः** – यदा विद्या भवेत्, तदा तव वृत्तिः, कीर्तिः, लक्ष्मीः, यशस्विनी वाणी, तत्त्वज्ञानं, परा शान्तिः च (भवेत्)।

**भावार्थः** – यदि त्वं विद्याम् अर्जयसि तर्हि त्वम् उद्योगं, यशः, धनं, कीर्तिप्रदां वाणीं, वास्तविकं ज्ञानम् उत्तमां शान्तिं च प्राप्नोषि, अतः निरन्तरं विद्यार्जनं करणीयम्।

© NCERT not to be republished

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥६॥



**पदच्छेदः** – विद्या नाम नरस्य रूपम् अधिकम् प्रच्छन्न-गुप्तं धनम् विद्या भोगकरी यशः-सुखकरी विद्या गुरूणाम् गुरुः विद्या बन्धु-जनः विदेश-गमने विद्या परा देवता विद्या राजसु पूज्यते न हि धनम् विद्या-विहीनः पशुः।

**अन्वयः** – विद्या नाम नरस्य अधिकं रूपं प्रच्छन्नगुप्तं धनं (च अस्ति)। विद्या भोगकरी यशःसुखकरी (च अस्ति)। विद्या गुरूणां गुरुः (अस्ति)। विद्या विदेशगमने बन्धुजनः (भवति)। विद्या परा देवता (अस्ति)। विद्या राजसु पूज्यते, धनं न हि (पूज्यते)। विद्याविहीनः (जनः) पशुः (भवति)।

**भावार्थः** – विद्या मनुष्यस्य श्रेष्ठं सौन्दर्यम् अस्ति, अदृश्यं गुप्तं च धनम् अस्ति। विद्या आनन्दं जनयति, कीर्तिं वर्धयति, सुखं च प्रददाति। विद्या गुरूणां गुरुः अस्ति। विदेशयात्रायां विद्या बन्धुः भवति। विद्या प्रधाना देवता अस्ति। राजसभासु विदुषाम् एव सम्मानः भवति, न तु धनिकस्य, अतः यः विद्याहीनः भवति सः पशुसमानः भवति।



**शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम्।**
**शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ॥७॥**



**पदच्छेदः** – शनैः पन्थाः शनैः कन्था शनैः पर्वत-लङ्घनम् शनैः विद्या शनैः वित्तम् पञ्च एतानि शनैः शनैः।

**अन्वयः** – पन्थाः शनैः, कन्था शनैः, पर्वतलङ्घनं शनैः, विद्या शनैः, वित्तं शनैः च एतानि पञ्च (कार्याणि) शनैः शनैः (करणीयानि)।

**भावार्थः** – मनुष्यः सर्वदा गमनसमये सावधानं चलेत्। वस्त्रस्य सीवनं जागरूकतया कुर्यात्। पर्वतस्य उपरि आरोहणं क्रमेण कुर्यात्। विद्यां धनं च निरन्तरं प्रयत्नेन अर्जयेत्। एतानि पञ्च कार्याणि शनैः अर्थात् सोपानक्रमेण एव कुर्यात्।



**न विद्यया विना सौख्यं नराणां जायते ध्रुवम्।**
**अतो धर्मार्थमोक्षेभ्यो विद्याभ्यासं समाचरेत् ॥८॥**

**पदच्छेदः** – न विद्यया विना सौख्यम् नराणाम् जायते ध्रुवम् अतः धर्म-अर्थ-मोक्षेभ्यः विद्याभ्यासम् समाचरेत्।

**अन्वयः** – विद्यया विना नराणां ध्रुवं सौख्यं न जायते। अतः धर्म-अर्थ-मोक्षेभ्यः विद्याभ्यासं समाचरेत्।

**भावार्थः** – मानवानां कृते विद्यार्जनम् अत्यन्तम् अनिवार्यं भवति। यदि नराः विद्यार्जनं न कुर्वन्ति तर्हि स्थिरं सुखं न प्राप्नुवन्ति। अतः धर्मसाधनाय अर्थलाभाय मोक्षं प्राप्तुं च विद्याभ्यासं कुर्यात्।

© NCERT not to be republished

**ताराणां भूषणं चन्द्रः लतानां भूषणं सुमम्।**
**पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्॥९॥**



**पदच्छेदः** – ताराणाम् भूषणम् चन्द्रः लतानाम् भूषणम् सुमम् पृथिव्याः भूषणम् राजा विद्या सर्वस्य भूषणम्।

**अन्वयः** – चन्द्रः ताराणां भूषणम् (अस्ति), सुमं लतानां भूषणम् (अस्ति), राजा पृथिव्याः भूषणम् (अस्ति), (परं) विद्या सर्वस्य भूषणम् (अस्ति)।

**भावार्थः** – तारकाः चन्द्रेण सह शोभन्ते। लताः कुसुमैः सह शोभन्ते। राजा पृथिव्याः शोभां वर्धयति। विद्यया सर्वेषां मनुष्याणां शोभा वर्धते।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥१०॥**



**पदच्छेदः** – न चोर-हार्यम् न च राज-हार्यम् न भ्रातृ-भाज्यम् न च भारकारि व्यये कृते वर्धते एव नित्यम् विद्या-धनम् सर्व-धन-प्रधानम्।

**अन्वयः** – (विद्याधनं) चोरहार्यं न (अस्ति), राजहार्यं न (अस्ति), भ्रातृभाज्यं न (अस्ति), भारकारि च न (अस्ति), व्यये कृते (विद्याधनं) नित्यं वर्धते एव, (अतः) विद्याधनं सर्वधनप्रधानम् (अस्ति)।

**भावार्थः** – चोरः धनं चोरयितुं शक्नोति। राजा धनम् अपहर्तुं शक्नोति। भ्रातृषु धनस्य विभाजनं भवितुम् अर्हति। धनस्य व्ययेन धनं न्यूनं भवति, किन्तु विद्यारूपं धनं चोरः चोरयितुं न शक्नोति। राजा तस्य अपहरणं कर्तुं न शक्नोति। विद्याधनस्य विभाजनं न भवति। विद्या भारयुक्ता न भवति। विद्यायाः वितरणेन विद्याधनम् इतोऽपि वर्धते, अतः सर्वधनेषु विद्याधनम् एव प्रमुखं धनम् अस्ति।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| ननु | खलु | है न | Isn't it | |
| रूपयौवनसम्पन्नाः | सौन्दर्येण यौवनेन च युक्ताः | सौन्दर्य और यौवन से सम्पन्न | Handsome & Youthful | |
| विशालकुलसम्भवाः | महति परिवारे जाताः | विशिष्ट परिवार में जन्मे हुए | Born in a privileged family | |
| निर्गन्धाः | गन्धहीनाः | गंधहीन | Without fragrance | |
| किंशुकाः | पलाशवृक्षाः | ढाक / टेसू का पेड़ | Flame of the forest trees | |
| धीमताम् | बुद्धिमताम् | बुद्धिमान लोगों का | Of Intelligent people | |
| व्यसनेन | भोगविलासेन | भोग-विलास के द्वारा | By the addiction and bad habits | |
| मदाय | गर्वाय | अभिमान के लिए | For arrogance | |
| परिपीडनाय | कष्टदानाय | कष्ट देने के लिए | For troubling | |
| खलः | दुष्टः | दुर्जन | Wicked | |
| शीलम् | वृत्तम् | चरित्र | Character | |
| मर्त्यलोके | पृथिव्याम् | संसार में | In this world | |
| भुवि | भूमौ | धरती पर | On the earth | |
| भारभूताः | भारकराः | भार | Burden | |
| कठिनव्रतम् | दीक्षा / सङ्कल्पपूर्वकं कर्म | कठोर नियम का पालन | Strict observance | |
| वृत्तिः | उद्योगः | आजीविका | Occupation | |
| लक्ष्मीः | सम्पत् | सम्पत्ति | Wealth | |
| यशस्विनी | कीर्तियुक्ता | कीर्ति से युक्त | Endowed with fame | |
| तत्त्वज्ञानम् | वास्तविकं ज्ञानम् | यथार्थ ज्ञान | Real knowledge | |

© NCERT not to be republished

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| प्रच्छन्नगुप्तम् | आवृतं रक्षितं च | ढँका हुआ और सुरक्षित | Covered and concealed | |
| भोगकरी | भोग्यवस्तूनां प्रदात्री | सुख-सुविधाओं को देने वाली/भोग्य वस्तुओं को देने वाली | That which gives materialistic pleasure | |
| यशःसुखकरी | या कीर्तिं सुखं च ददाति | ख्याति तथा सुख देने वाली | That which gives fame and happiness | |
| विदेशगमने | अन्यदेशेषु भ्रमणसमये | विदेश जाने पर | While travelling other places | |
| परा | श्रेष्ठा | श्रेष्ठ | Great | |
| विद्याविहीन: | ज्ञानरहितः | विद्या-रहित | Devoid of education | |
| पन्था: | मार्ग: | पथ | The way / Route / Road | |
| कन्था | पुरातनवस्त्रैः निर्मितम् आस्तरणम् | जीर्ण-शीर्ण वस्त्रों से बनी मोटी चादर | Rug made from rags | |
| वित्तम् | धनम् | धन | Money | |
| सौख्यम् | सुखम् | आनन्द | Happiness | |
| ध्रुवम् | स्थिरम् | निश्चित | Certain | |
| समाचरेत् | करणीयम् | करना चाहिए | Should do | |
| अनिवार्यम् | अत्यन्तम् आवश्यकम् | अत्यन्त आवश्यक | Mandatory | |
| ताराणाम् | नक्षत्राणाम् | नक्षत्रों का | Of the stars | |
| भूषणम् | अलङ्कारः | आभूषण | Ornament | |
| सुमम् | कुसुमम् | पुष्प | Flower | |
| चोरहार्यम् | चोरेण हरणयोग्यम् | चोर के द्वारा हरण योग्य | Can be stolen by thieves | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| राजहार्यम् | शासकेन हरणयोग्यम् | राजा के द्वारा हरण करने योग्य | Able to be grabbled by Kings | |
| वितरणेन | सर्वेभ्यः प्रदानेन | बाँटने से | By distribution | |
| भ्रातृभाज्यम् | भ्रातृ-भगिनीषु विभाजनयोग्यम् | भाई-बहनों में बाँटने योग्य | Fit to be distributed amongst siblings | |
| भारकारि | भारभूतम् | भार स्वरूप | Heavy | |
| व्यये कृते | यदि व्ययः क्रियते | खर्च करने पर | By spending | |
| विद्याधनम् | विद्यानामकं धनम् | विद्या रूपी धन | Wealth in the form of knowledge | |
| सर्वधनप्रधानम् | सर्वेषु धनेषु मुख्यम् | सभी प्रकार के धनों में प्रमुख | Most important amongst all kinds of wealth | |



## वयम् अभ्यासं कुर्मः

**१. अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तरं लिखन्तु —**

(क) विद्याहीनाः कीदृशाः किंशुकाः इव न शोभन्ते ? ....................................

(ख) धीमतां कालः कथं गच्छति ? ....................................

(ग) केषां कालः निद्रया कलहेन वा गच्छति ? ....................................

(घ) खलस्य विद्या किमर्थम् ? ....................................

(ङ) सज्जनस्य विद्या किमर्थम् ? ....................................

(च) चन्द्रः केषां भूषणम् अस्ति ? ....................................

(छ) सर्वधनप्रधानं किम् ? ....................................

© NCERT not to be republished

## २. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु —

(क) निर्गन्धाः किंशुकाः इव के न शोभन्ते ?

(ख) मूर्खाणां कालः कथं गच्छति ?

(ग) दुर्जनः विद्यायाः धनस्य शक्तेः च उपयोगं कथं करोति ?

(घ) कीदृशाः मनुष्याः भुवि भारभूताः भवन्ति ?

(ङ) शनैः शनैः कानि साधनीयानि ?

## ३. उचितान् वाक्यांशान् परस्परं संयोजयन्तु —

| (क) | (ख) |
|---|---|
| • तदा वृत्तिश्च कीर्तिश्च | पञ्चैतानि शनैः शनैः |
| • खलस्य साधोर्विपरीतमेतत् | निर्गन्धा इव किंशुका: |
| • शनैर्विद्या शनैर्वित्तं | यदा विद्या भवेत्तव |
| • विद्याहीना न शोभन्ते | न भातृभाज्यं न च भारकारि |
| • न चोरहार्यं न च राजहार्यम् | ज्ञानाय दानाय च रक्षणाय |
| • विद्या राजसु पूज्यते | विद्याभ्यासं समाचरेत् |
| • अतो धर्मार्थमोक्षेभ्य: | न हि धनम् |

## ४. उदाहरणानुसारम् अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु —

(क) राजा पृथिव्याः भूषणं भवति। – राजा कस्याः भूषणं भवति ?

(ख) साधो: विद्या ज्ञानाय भवति। – .......................... विद्या ज्ञानाय भवति ?

(ग) विद्या गुरूणां गुरु:। – विद्या .......................... गुरु: ?

(घ) ते मर्त्यलोके भुवि भारभूता: भवन्ति। – ते मर्त्यलोके भुवि .......................... भवन्ति ?

© NCERT not to be republished

(ङ) विद्याहीनाः न शोभन्ते। – ........................ न शोभन्ते?

(च) सर्वस्य लोचनं शास्त्रम्। – सर्वस्य लोचनं ........................ ?

(छ) विद्या राजसु पूज्यते। – ........................ राजसु पूज्यते?

(ज) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्। – ........................ धीमतां कालो गच्छति?

**५. मञ्जूषातः समुचितानि पदानि स्वीकृत्य रिक्तस्थानानि पूरयन्तु—**

**रक्षणाय, मदाय, विवादाय, परिपीडनाय, ज्ञानाय, दानाय**

| सज्जनस्य | | दुर्जनस्य | |
|---|---|---|---|
| शक्तिः | ........................ | शक्तिः | ........................ |
| विद्या | ........................ | विद्या | ........................ |
| धनम् | ........................ | धनम् | ........................ |

**६. उदाहरणानुसारम् अधोलिखितानां पदानां विभक्तिं वचनं च लिखन्तु—**

| | | | |
|---|---|---|---|
| यथा – ताराणाम् | – | षष्ठी विभक्तिः | बहुवचनम् |
| (क) विद्याम् | – | ........................ | ........................ |
| (ख) धनस्य | – | ........................ | ........................ |
| (ग) कलहेन | – | ........................ | ........................ |
| (घ) नराणाम् | – | ........................ | ........................ |
| (ङ) मर्त्यलोके | – | ........................ | ........................ |
| (च) ज्ञानाय | – | ........................ | ........................ |
| (छ) राजसु | – | ........................ | ........................ |

© NCERT not to be republished

## योग्यताविस्तरः



### विद्यायाः सन्दर्भे श्लोकाः

नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत्।
नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम्॥

विद्याभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्॥

ज्ञातिभिर्वण्ट्यते नैव चोरेणापि न नीयते।
दाने नैव क्षयं याति विद्यारत्नं महाधनम्॥



### विद्या इति शब्दस्य रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | विद्या | विद्ये | विद्याः |
| द्वितीयाविभक्तिः | विद्याम् | विद्ये | विद्याः |
| तृतीयाविभक्तिः | विद्यया | विद्याभ्याम् | विद्याभिः |
| चतुर्थीविभक्तिः | विद्यायै | विद्याभ्याम् | विद्याभ्यः |
| पञ्चमीविभक्तिः | विद्यायाः | विद्याभ्याम् | विद्याभ्यः |
| षष्ठीविभक्तिः | विद्यायाः | विद्ययोः | विद्यानाम् |
| सप्तमीविभक्तिः | विद्यायाम् | विद्ययोः | विद्यासु |
| संबोधनम् | (हे) विद्ये ! | (हे) विद्ये ! | (हे) विद्याः ! |

## परियोजनाकार्यम्

१. क, त, व, म, य इति पञ्चभिः वर्णैः श्लोकान् सङ्गृह्य स्फोरकपत्रे लिखन्तु, शिक्षकस्य अनुमत्या कक्षाभित्तिषु स्थापयन्तु।

२. यथा अस्मिन् पाठे अन्त्याक्षरीश्लोकाः दत्ताः सन्ति तथैव विविधस्रोतोभ्यः (ग्रन्थालयः, अन्तर्जालम्, अध्यापकाः, मित्राणि इत्यादिभ्यः) सुभाषितानि चित्वा अन्त्याक्षरीक्रमेण लिखन्तु।

© NCERT not to be republished



## कार्यकलापः

### १. पदान्त्याक्षरी क्रीडा।

कक्षायां पदान्त्याक्षरीं क्रीडन्तु। यथा –

प्रथमः छात्रः – रामः ('म'कारः अन्तिमवर्णः)

द्वितीयः छात्रः – मानवः ('व'कारः अन्तिमवर्णः)

तृतीयः छात्रः – वनम् (अत्र 'न'कारः अन्तिमवर्णः)

चतुर्थः छात्रः – नकुलः (एवमेव अग्रे क्रीडा भविष्यति)

वस्तुतः वनम् इति पदस्य अन्ते 'म्' वर्तते। यदा पदस्य अन्ते 'म्'-वर्णः, विसर्गः, अनुस्वारः वा भवति तदा 'म्'-वर्णात्, विसर्गात्, अनुस्वारात् च पूर्वस्थं व्यञ्जनवर्णं स्वीकृत्य एव अग्रिमं पदं वक्तव्यम्।

### २. क्रियापदानां स्मरणक्रीडा।

छात्राः क्रियापदानां स्मरणक्रीडां कर्तुं शक्नुवन्ति। यथा –

प्रथमः छात्रः – गच्छति

द्वितीयः छात्रः – गच्छति पठति

तृतीयः छात्रः – गच्छति पठति लिखति

चतुर्थः छात्रः – गच्छति पठति लिखति नयति

(प्रथमः छात्रः यत् क्रियापदं वदति द्वितीयः छात्रः तत् क्रियापदम् उक्त्वा द्वितीयं नूतनं क्रियापदं वदति। तथैव तृतीयः छात्रः प्रथमं द्वितीयं च क्रियापदम् उक्त्वा नूतनं क्रियापदं वदति। एवमेव 'क्रियापदानां स्मरणक्रीडा' अनुवर्तते।)

### ३. वर्णलेखन्या अधोलिखितं श्लोकं पूरयन्तु —

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

© NCERT not to be republished

## सप्तमः पाठः

# ईशावास्यम् इदं सर्वम्

0772CH07



(हिरण्यकशिपोः सभा)

**राजभटः** – अयि भोः सावधानाः तिष्ठन्तु। राजाधिराजः राजगम्भीरः त्रैलोक्याधिपतिः देवाधिदेवः दैत्यराजः हिरण्यकशिपुः आगच्छति।

**सभासदः** – विजयतां महाराज! विजयताम्। विजयतां महाराज! विजयताम्।

**हिरण्यकशिपुः** – ह ह ह ह.... (*अट्टहासेन सह*) अहम् एव सर्वशक्तिमान् अस्मि। अहम् अमरः अस्मि।

**मन्त्री** – सत्यं दैत्यराज! सुराः असुराः यक्ष-गन्धर्व-किन्नराः भवतः सर्वे भीताः तिष्ठन्ति।

**दैत्यपुरोहितः** – भगवन्! देशे सर्वत्र भवतः एव पूजा भवति। अन्यदेवतानाम् पूजाराधनं न भवति। इतः परं यज्ञभागादिकम् अपि देवेभ्यः न केऽपि दास्यन्ति।

**हिरण्यकशिपुः** – साधु साधु। अयि भोः मन्त्रिन्! सर्वत्र जनाः मामेव ध्यायन्ति खलु!

**मन्त्री** – देव! सर्वत्र भवतः एव नामकीर्तनं भवति, किन्तु .......... (*अधोमुखः मौनं तिष्ठति।*)

**हिरण्यकशिपुः** – (*सक्रोधम्*) आः! जानामि जानामि। भवान् मम पुत्रस्य विषये वक्तुम् इच्छति खलु।

**मन्त्री** – (*मन्दध्वनिना*) सत्यं देव!

**हिरण्यकशिपुः** – मम पुत्रकः एव मम शत्रुः अस्ति। कुलकलङ्कः सः प्रह्लादः अहर्निशं मम शत्रोः हरेः गुणगानं करोति।

**सेनापतिः** – स्वामिन्! गजस्य पद-दलनेन अपि सः जीवति।

**हिरण्यकशिपुः** – अहो महदाश्चर्यम्!

**सेनापतिः** – भवदाज्ञया वयम् उत्तुङ्गशिखरात् तं पातितवन्तः। तथापि सः न मृतः।

**मन्त्री** – रज्ज्वा बद्ध्वा समुद्रमध्ये क्षिप्तवन्तः। तथापि....

**हिरण्यकशिपुः** – (*हस्तौ मर्दयन् सक्रोधम्*) आः ... किं करवाणि, किं करवाणि एतस्य। (*किञ्चिद् विचिन्त्य*) आस्तां तावत्। उपायः मया चिन्तितः। द्रक्ष्यामि सः कथं जीविष्यति इति। (वदन् सभातः निर्गतः।)

(सर्वे निष्क्रान्ताः)

**हिरण्यकशिपुः** – अयि भोः अनुजे! होलिके!! होलिके!!! कुत्र असि त्वम्? इत इतः।

**होलिका** – प्रणमामि भ्रातः! कथं मां स्मरसि? किमर्थं दुःखितः भासि? किं कारणम् अस्य दुःखस्य? वद भ्रातः! वद।

**हिरण्यकशिपुः** – अनुजे! त्वं जानासि एव, मम पुत्रः एव मम शत्रुः जातः। (*क्षीणस्वरेण सर्वं वृत्तान्तं कथयति*)



© NCERT not to be republished

होलिका – भ्रातः ! अलं चिन्तया, ब्रह्मणः वरप्रसादात् अग्निः मां न दहति, अहं ज्वालयिष्यामि प्रह्लादम्। आश्वस्तो भव।

(होलिका प्रह्लादकक्षं प्रविशति)

प्रह्लादः – (होलिकां दृष्ट्वा) पितृष्वसः ! (*आलिङ्गति*)

होलिका – अयि भोः प्रह्लाद ! आगच्छ, आवां क्रीडिष्यावः।

प्रह्लादः – (*सहर्षम्*) बाढम्।

होलिका – प्रथमं त्वं माम् अन्विष्यसि।

प्रह्लादः – (*सहर्षम्*) साधु।

*(होलिका प्रह्लादस्य नेत्रयोः पट्टिकां बध्नाति। किञ्चित् दूरे अग्निं प्रज्वालयति। स्वयम् अग्नौ उपविश्य करतलध्वनिना आह्वयति।)*

होलिका – अत्र, अहम् अत्र अस्मि, इत इतः।

प्रह्लादः – अहो तापम् अनुभवामि खलु अहम्।

*(प्रह्लादः अग्निकुण्डस्य समीपम् गच्छति।*
*होलिका तम् अङ्के स्वीकरोति।)*

होलिका – ह.....ह....ह... प्रह्लाद !
अहं तव मृत्युः अस्मि।
अहं त्वाम् अग्नये दास्यामि।

प्रह्लादः – (करौ बद्ध्वा हरिं स्मरति)
ॐ नमो नारायणाय,
ॐ नमो नारायणाय,
ॐ नमो नारायणाय....



*(नारायणस्य कृपया प्रह्लादः रक्षितः भवति। ब्रह्मणः वरस्य दुरुपयोगकारणात् अग्निः होलिकाम् एव ज्वालयति। होलिका अग्निदाहात् आर्तनादं कुर्वती प्राणान् त्यजति।)*

© NCERT not to be republished



दैत्याः – अहो ! किमेतत् ? होलिका एव दग्धा।

*(ततः प्रविशति प्रह्लादः हिरण्यकशिपुः च)*

प्रह्लादः – ॐ नमो नारायणाय, ॐ नमो नारायणाय...

हिरण्यकशिपुः – *(सक्रोधं दन्तान् विघट्टयन्)* आः, नारायण ! नारायण ! दर्शय, कुत्र अस्ति तव नारायणः ?

प्रह्लादः – तात ! श्रीहरिः तु सर्वत्र अस्ति।

हिरण्यकशिपुः – किं ते हरिः अत्र अस्ति ? तत्र अस्ति ? सोपानेषु अस्ति ? अथवा अस्मिन् स्तम्भे अस्ति ?

प्रह्लादः – नूनं हरिः सर्वत्र अस्ति। अस्मिन् स्तम्भे अपि अस्ति।

हिरण्यकशिपुः – आः, मूढ ! पश्य पश्य, अनेन खड्गेन स्तम्भं भङ्क्ष्यामि।

प्रह्लादः – ॐ नमो नारायणाय, ॐ नमो नारायणाय, ॐ नमो नारायणाय...

*(हिरण्यकशिपुः स्तम्भं प्रहरति। महता गर्जनेन नृसिंहः स्तम्भात् बहिः आगच्छति)*

**नृसिंहः** – (*क्रोधेन सिंहगर्जनं कुर्वन्*) रे पापात्मन् ! अद्य तव मृत्युः सन्निहितः। कालोऽहं तव।

**हिरण्यकशिपुः** – (*आदौ आश्चर्येण पश्यति पुनः कथयति*) आः, असत्यवादिन् ! अहं ब्रह्मदेवात् वरं प्राप्य अमरः अस्मि। त्वाम् एव मृत्युलोकं प्रेषयिष्यामि।

(*तस्मिन् सन्ध्याकाले नृसिंहः हिरण्यकशिपुं केशेषु गृहीत्वा कर्षति*)

**नृसिंहः** – रे मूर्ख ! अधम ! त्वं ब्रह्मदेवात् वरं प्राप्तवान् असि, तं वरम् अनुल्लङ्घ्य अहं त्वां मारयिष्यामि।

(*राजभवनस्य अन्तः बहिः च एतयोः मध्ये विद्यमानायां देहल्यां तं गृह्णाति*)

मूढ ! पश्य, न त्वमसि भुवि, न च स्वर्गे ;
न वा पाताले, न च आकाशे ;
न गृहाभ्यन्तरे, बहिर्भागे वा ;
नायं दिवसो, न वा रात्रिः ;
नाहं मनुष्यो, न च पशुः ;
न अस्त्रेण, न च शस्त्रेण ;
निजनखैः तव वक्षःस्थलं
विदीर्य हनिष्यामि।



**हिरण्यकशिपुः** – (*भीतः*) प्रभो ! क्षमस्व मां, क्षमस्व।

**नृसिंहः** – अधम ! न तेऽपराधः क्षम्यः। (*सिंहगर्जनं कुर्वन् हिरण्यकशिपोः वक्षःस्थलं भिनत्ति।*)

**अध्यापिका** – एवं बालः प्रह्लादः ईश्वरः सर्वत्र अस्ति इति दर्शितवान्। अत एव उच्यते, '**ईशावास्यम् इदं सर्वम्**' इति।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| ईशावास्यम् | ईश्वरेण व्याप्तम् | ईश्वर से व्याप्त | Pervaded by God | |
| राजगम्भीरः | राजसु गम्भीरः | राजाओं में कुशलतम | The best amongst the Kings | |
| कश्चन | कोऽपि जनः | कोई व्यक्ति | Someone (M) | |
| विजयताम् | जयतु | विजयी होवे | Let (him) be victorious | |
| सर्वशक्तिमान् | सर्वसामर्थ्यवान् | सबसे अधिक शक्तिशाली | All powerful | |
| यक्षाः | कुबेरस्य अनुचराः | यक्ष | Yakshas (type of Demi-Gods) | |
| गन्धर्वाः | दिव्यगायकाः | गन्धर्व | Gandharvas (type of Demi-Gods) | |
| किन्नराः | किम्पुरुषाः (देवानां जातिविशेषः) | किन्नर | Kinnaras (type of Demi-Gods) | |
| यज्ञभागः | हविः | यज्ञ-आहुति | Yajna offering | |
| आराधनम् | पूजनम् | पूजा | Worship | |
| दास्यन्ति | दानं करिष्यन्ति | देंगे | Shall give | |
| ध्यायन्ति | चिन्तयन्ति | ध्यान करते हैं | Meditate | |
| नामकीर्तनम् | नामस्तुतिः | नाम जपना | Singing the Name in praise | |
| सक्रोधम् | कोपेन सह | क्रोध सहित | With Anger | |
| खलु (अव्ययम्) | ननु | निश्चित रूप से | Indeed | |
| कुलकलङ्कः | कुलपातकः | वंश को कलंकित करने वाला | One who brings ill-fame to the family | |
| अहर्निशम् | अहोरात्रः | दिन-रात | Day and night | |
| पद-दलनेन | पदकुट्टनेन | पैरों के द्वारा कुचलने से | Stamped (by foot) | |
| उत्तुङ्गशिखरात् | उन्नतपर्वतस्य अग्रभागात् | ऊँचे पर्वत के शिखर से | From the peak of a high mountain | |
| रज्ज्वा | वराटकेन | रस्सी के द्वारा | By the rope | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| बद्ध्वा | निबध्य | बाँधकर | Having tied | |
| क्षिप्तवन्तः | त्यक्तवन्तः | फेंक दिया | (They) Threw | |
| विचिन्त्य | चिन्तनं कृत्वा | सोचकर | Having thought | |
| द्रक्ष्यामि | अवलोकयिष्यामि | देखूँगा | Shall see | |
| निष्क्रान्तः | निर्गतः | निकल गया | Went out | |
| भासि | प्रतीयसे | लग रहे हो | Seem | |
| वृत्तान्तम् | वार्ताम् | वृत्तान्त या घटना को | Account / Anecdote | |
| अलं चिन्तया | चिन्तां मा कुरु | चिंता मत करो | Do not worry | |
| पितृष्वसः ! | पितुः भगिनि ! | हे बुआ ! | Hey Paternal Sister ! | |
| बाढम् | निश्चयेन | अवश्य | Certainly | |
| अन्विष्यसि | मार्गयिष्यसि | ढूँढ़ोगे | (You) Shall search | |
| करतलध्वनिना | तालिकावादनेन | ताली बजा करके | Clap sound | |
| प्रज्वलयति | उद्दीपयति | जलाता है | Kindles | |
| इत इतः | अनेन मार्गेण | इस ओर | This way | |
| आर्तनादम् | चीत्कार-क्रन्दनम् | चिल्लाकर रोना | Cry for help | |
| भङ्क्ष्यामि | भग्नं करिष्यामि | तोड़ दूँगा | (I) Shall break | |
| सन्निहितः | समागतः | पास आया | Came near | |
| कालोऽहम् | यमः अहम् | मैं मृत्यु हूँ | I am Death | |
| मृत्युलोकम् | यमपुरम् | यमलोक | Realm of death | |
| कर्षति | आकर्षति | खींचता है | Pulls | |
| देहल्याम् | द्वारतले | देहरी में | Threshold | |
| निजनखैः | स्वस्य करजैः | अपने नाखूनों से | By own nails | |
| अधम ! | हे क्षुद्रजन ! | हे नीच ! | O' Low calibre person ! | |
| क्षम्यः | सोढव्यः | क्षमा करने योग्य | Worthy of forgiving | |
| वक्षःस्थलम् | उरःस्थलम् | छाती | Chest | |
| भिनत्ति | विदीर्णं करोति | चीरता है | Tears apart | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**(क) वाक्ये उपकरणार्थे तृतीया विभक्तिः भवति।**

यथा – हिरण्यकशिपुः खड्गेन स्तम्भं भञ्जयति।
बालकः लेखन्या लिखति।
पितामहः चषकेण क्षीरं पिबति।

**(ख) क्रियाविशेषण-स्वभाववाचक-शब्दानां तृतीया विभक्तिः भवति।**

यथा – हिरण्यकशिपुः आश्चर्येण आह।
नृसिंहः क्रोधेन गर्जति।

## तृतीया-विभक्तेः रूपाणि

| | मूलशब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पुंलिङ्गशब्दाः | बालक | बालकेन | बालकाभ्याम् | बालकैः |
| | वृक्ष | वृक्षेण | वृक्षाभ्याम् | वृक्षैः |
| | शिक्षक | शिक्षकेण | शिक्षकाभ्याम् | शिक्षकैः |
| | तद् | तेन | ताभ्याम् | तैः |
| | किम् | केन | काभ्याम् | कैः |
| स्त्रीलिङ्गशब्दाः | छात्रा | छात्रया | छात्राभ्याम् | छात्राभिः |
| | शिक्षिका | शिक्षिकया | शिक्षिकाभ्याम् | शिक्षिकाभिः |
| | गदा | गदया | गदाभ्याम् | गदाभिः |
| | तद् | तया | ताभ्याम् | ताभिः |
| | किम् | कया | काभ्याम् | काभिः |
| नपुंसकलिङ्गशब्दाः | वन | वनेन | वनाभ्याम् | वनैः |
| | पुस्तक | पुस्तकेन | पुस्तकाभ्याम् | पुस्तकैः |
| | फल | फलेन | फलाभ्याम् | फलैः |
| | तद् | तेन | ताभ्याम् | तैः |
| | किम् | केन | काभ्याम् | कैः |

© NCERT not to be republished

**उच्चैः पठन्तु अवगच्छन्तु च।**

**लृट् लकारः (भविष्यत्-काले एतस्य लकारस्य प्रयोगः भवति)**

**पठ् धातुः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

**वयं वाक्येषु लृट्-लकारस्य प्रयोगं पठामः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बालकः पाठं पठिष्यति | बालकौ पाठं पठिष्यतः | बालकाः पाठं पठिष्यन्ति |
| मध्यमपुरुषः | त्वं पाठं पठिष्यसि | युवां पाठं पठिष्यथः | यूयं पाठं पठिष्यथ |
| उत्तमपुरुषः | अहं पाठं पठिष्यामि | आवां पाठं पठिष्यावः | वयं पाठं पठिष्यामः |

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु—**

(क) दैत्यराजः कः ? ..........................................

(ख) के हिरण्यकशिपुं ध्यायन्ति ? ..........................................

(ग) किं देवेभ्यः न दास्यन्ति ? ..........................................

(घ) कस्य दलनेन अपि सः जीवति ? ..........................................

(ङ) राक्षसाः कुतः प्रह्लादं पातितवन्तः ? ..........................................

(च) हिरण्यकशिपुः कस्मात् वरं प्राप्तवान् ? ..........................................

(छ) हरिः कुत्र अस्ति इति कः वदति ? ..........................................

२. **अधः प्रदत्तानां प्रश्नानाम् पूर्णवाक्येन उत्तराणि लिखन्तु —**



(क) के भीताः तिष्ठन्ति ?

(ख) प्रह्लादः अहर्निशं किं करोति ?

(ग) प्रह्लादं कथं समुद्रे क्षिप्तवन्तः ?

(घ) नृसिंहः कथं बहिः आगच्छति ?

(ङ) हिरण्यकशिपुः केन स्तम्भं भङ्क्ष्यामि इति वदति ?

३. **उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु —**

| | | | |
|---|---|---|---|
| (क) | ……रामेण…… | रामाभ्याम् | ……रामैः…… |
| (ख) | चमसेन | ………………… | ………………… |
| (ग) | आचार्येण | ………………… | आचार्यैः |
| (घ) | ………………… | ………………… | आसन्दैः |
| (ङ) | बालिकया | ………………… | बालिकाभिः |
| (च) | ………………… | पेटिकाभ्याम् | ………………… |
| (छ) | मित्रेण | ………………… | ………………… |
| (ज) | ………………… | ………………… | वस्त्रैः |



© NCERT not to be republished

४. **उदाहरणानुसारं रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु —**

(क) <u>हिरण्यकशिपुः</u> आगच्छति। – ……कः आगच्छति ?……

(ख) <u>सुरासुराः</u> सर्वे भीताः भविष्यन्ति। – ………………………………

(ग) दैत्यराजः <u>खड्गेन</u> प्रहरति। – ………………………………

(घ) अहं <u>प्रह्लादं</u> मारयिष्यामि। – ………………………………

(ङ) तात ! हरिस्तु <u>सर्वत्र</u> अस्ति। – ………………………………

(च) पुत्रस्य विषये वक्तुम् इच्छति। – ………………………………

(छ) नृसिंहः निजनखैः हिरण्यकशिपुं मारितवान्। – ………………………………

**५. अधः प्रदत्तेषु रिक्तस्थानेषु तृतीया-विभक्त्यन्तानि रूपाणि लिखन्तु—**

(क) अहं मम ……………………… (खड्ग) स्तम्भं भङ्क्ष्यामि।

(ख) प्रह्लादः गजस्य ……………………… (पददलन) अपि जीवति।

(ग) सर्वे जनाः ……………………… (नारायण) अनुगृहीताः।

(घ) ……………………… (निजनख) तव वक्षःस्थलं विदीर्य मारयिष्यामि।

(ङ) बालिकाः ……………………… (शिक्षिका) सह चर्चां कुर्वन्ति।

**६. उदाहरणानुसारं संयोज्य लिखन्तु—**

| | | | | | |
|---|---|---|---|---|---|
| (क) | रमा | + | ईशः | = | ……रमेशः…… |
| (ख) | सुर | + | ईश्वरः | = | ……………… |
| (ग) | नाग | + | इन्द्रः | = | ……………… |
| (घ) | गज | + | इन्द्रः | = | ……………… |
| (ङ) | माता | + | इव | = | ……………… |
| (च) | राम | + | इति | = | ……………… |
| (छ) | पर | + | उपकारः | = | ……………… |
| (ज) | मम | + | उपरि | = | ……………… |
| (झ) | सूर्य | + | उदयः | = | ……………… |
| (ञ) | रामेण | + | उक्तम् | = | ……………… |
| (ट) | तस्य | + | उपरि | = | ……………… |



© NCERT not to be republished

७. उदाहरणानुसारं वाक्यानि वर्तमानकालतः भविष्यत्-काले परिवर्तयन्तु—

| वर्तमानकालः | | भविष्यत्कालः |
|---|---|---|
| (क) सा आपणं गच्छति। | – | सा आपणं गमिष्यति। |
| (ख) रमा क्रीडाङ्गणे क्रीडति। | – | .................................................. |
| (ग) बालाः फलानि खादन्ति। | – | .................................................. |
| (घ) ताः योगासनं कुर्वन्ति। | – | .................................................. |
| (ङ) अहं नित्यं पठामि। | – | .................................................. |
| (च) त्वं कस्मिन् विषये वदसि? | – | .................................................. |
| (छ) आवां पाठं लिखावः। | – | .................................................. |
| (ज) यूयं शालां गच्छथ। | – | .................................................. |
| (झ) ते बालिके वैद्ये भवतः। | – | .................................................. |
| (ञ) वयं श्लोकान् स्मरामः। | – | .................................................. |

८. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु—

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | बालकः कार्यं करिष्यति। | बालकौ कार्यं करिष्यतः। | बालकाः कार्यं करिष्यन्ति। |
| (ख) | सः शालां गमिष्यति। | ................................ | ................................ |
| (ग) | त्वं श्लोकं वदिष्यसि। | ................................ | ................................ |
| (घ) | ................................ | आवां पुस्तकानि दास्यावः। | ................................ |
| (ङ) | ................................ | ................................ | छात्राः प्रदर्शनीं द्रक्ष्यन्ति। |
| (च) | अहं भगवद्गीतां श्रोष्यामि। | ................................ | ................................ |
| (छ) | ................................ | बालिके कथां लेखिष्यतः। | ................................ |
| (ज) | ................................ | ................................ | यूयं किं खादिष्यथ? |

© NCERT not to be republished



## योग्यताविस्तरः

१. एषा घटना नरसिंहपुराणे श्रीमद्भागवतपुराणे च वर्णिता अस्ति। एतयोः पुराणयोः रचयिता महर्षिः वेदव्यासः अस्ति। सः एव अष्टादश पुराणानि लिखितवान्। नरसिंहपुराणम् एकम् उपपुराणम् अस्ति। नृसिंहावतारविषये कांश्चन प्रमुखांशान् जानीमः।

- बिहारराज्ये 'पूर्णिया'जनपदे बनमनखी-ग्रामे सिकलीगढधरहरा इति इतिहासप्रसिद्धं स्थानम्।
- अस्मिन् एव स्थाने भगवान् नृसिंहः अवतारं प्राप्तवान् इति ख्यातिः वर्तते।
- अत्रैव नृसिंहः हिरण्यकशिपोः वधं कृत्वा प्रह्लादस्य रक्षणं कृतवान्।
- भक्तस्य प्रह्लादस्य हिरण्यकशिपोः च साम्राज्यं अत्रैव आसीत् ।
- अधुनापि अत्र कश्चन विशालः बृहदाकारकः प्रसिद्धः माणिक्यनामकः स्तम्भः वर्तते।
- यस्यां देहल्यां दैत्यराजस्य हिरण्यकशिपोः वधः जातः, तस्याः एव देहल्याः पार्श्वस्तम्भः एषः इति जनश्रुतिः वर्तते। तस्य भञ्जनार्थं बहुधा प्रयासः कृतः तथापि न भग्नः इत्यपि श्रूयते।
- हिरण्यकशिपोः अनुजायाः होलिकायाः दहनम् अत्रैव जातमिति मन्यते।
- तदर्थमेव अत्रत्याः जनाः प्रतिवर्षं भस्मना मृत्तिकया च होलिकां क्रीडन्ति।
- तदारभ्य भारतवर्षे जनाः होलिकोत्सवम् आचरन्ति इत्यपि ख्यातिः वर्तते।
- अत्र नृसिंहस्य प्राचीनः देवालयः अपि अस्ति। सद्यः सः देवालयः पुनर्नवीकृतः।
- अस्मिन् मन्दिरे ब्रह्म-विष्णु-महेश्वरसहितं प्रायः 40 देवतानां प्रतिमाः सन्ति।
- वैदिककाले होलिकोत्सवः वसन्तोत्सवरूपेणापि आचर्यते।
- होलकः तृणाग्नौ भृष्टम् अर्द्धपक्वं धान्यम्। होरा इति हिन्दी भाषायाम्। यदा नवगोधूमादि-धान्यानि गृहेषु आगच्छन्ति, तदा कृषकः प्रसन्नो भूत्वा अग्नौ हविः समर्प्य उत्सवम् आचरति सः होलिकोत्सवः भवति।
- शास्त्रेषु होलिकोत्सवः '**वासन्तीय-नवसस्येष्टिः**' उच्यते।

२. भारतीयज्ञानपरम्परायां संस्कृतवाङ्मयस्य विशेषतः पुराणानां महती भूमिका वर्तते। प्रधानतया अष्टादश पुराणानि सन्ति।

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिंगकूस्कानि पुराणानि प्रचक्षते॥**

© NCERT not to be republished

- मद्वयम् – १. मत्स्यपुराणम्  २. मार्कण्डेयपुराणम्
- भद्वयम् – ३. भागवतपुराणम्  ४. भविष्यपुराणम्
- ब्रत्रयम् – ५. ब्रह्मपुराणम्  ६. ब्रह्माण्डपुराणम्  ७. ब्रह्मवैवर्तपुराणम्
- वचतुष्टयम् – ८. वायुपुराणम्  ९. वराहपुराणम्  १०. वामनपुराणम्  ११. विष्णुपुराणम्
- अनापलिङ्गकूस्कानि – १२. अग्निपुराणम्  १३. नारदपुराणम्  १४. पद्मपुराणम्  १५. लिङ्गपुराणम्  १६. गरुडपुराणम्  १७. कूर्मपुराणम्  १८. स्कन्दपुराणम्



## परियोजनाकार्यम्

१. माता-पित्रोः शिक्षकस्य च साहाय्येन मानवानां षोडश-संस्काराणां नामानि लिखन्तु।

२. पुराणेभ्यः कामपि एकां कथां संगृह्य लिखन्तु, कक्षायां श्रावयन्तु च।



## कार्यकलापः

कक्षायाः सर्वे छात्राः मिलित्वा अस्य नाटकस्य अभिनयं कुर्वन्तु।

© NCERT not to be republished

अष्टमः पाठः

# हितं मनोहारि च दुर्लभं वचः

0772CH08




© NCERT not to be republished

## माता भूमिः पुत्रोऽहं पृथिव्याः ॥१॥

**पदच्छेदः** – माता भूमिः पुत्रः अहम् पृथिव्याः।

**अन्वयः** – भूमिः माता (अस्ति) अहं पृथिव्याः पुत्रः (अस्मि)।

**भावार्थः** – पृथ्वी अस्मान् माता इव लालयति पालयति च। अतः भूमिः अस्माकं सर्वेषां माता अस्ति। वयं सर्वे अस्याः पृथिव्याः सन्तानाः स्मः। एषा सर्वदा पूज्या अस्ति।



## न रत्नमन्विष्यति, मृग्यते हि तत् ॥२॥

**पदच्छेदः** – न रत्नम् अन्विष्यति मृग्यते हि तत्।

**अन्वयः** – रत्नं न अन्विष्यति, तत् मृग्यते हि।

**भावार्थः** – हीरकादीनि रत्नानि ग्राहकस्य अन्वेषणं न कुर्वन्ति अपितु ग्राहकाः एव रत्नानाम् अन्वेषणं कुर्वन्ति। तथैव अस्मासु यदि गुणाः सन्ति तर्हि गुणज्ञाः स्वयमेव अस्मान् अन्विष्य आगच्छन्ति।



## शरीरमाद्यं खलु धर्मसाधनम्॥३॥

**पदच्छेदः** – शरीरम् आद्यम् खलु धर्मसाधनम्।

**अन्वयः** – शरीरं खलु आद्यं धर्मसाधनम्।

**भावार्थः** – यदि अस्माकं शरीरं स्वस्थम् अस्ति तर्हि वयं स्वकर्तव्यस्य पालनं कर्तुं शक्नुमः, अतः अस्माभिः स्वशरीरस्य रक्षा सर्वथा करणीया यतः शरीरम् एव धर्मपालनस्य प्रथमं साधनम् अस्ति।






## क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्॥४॥

**पदच्छेदः** – क्षणशः कणशः च एव विद्याम् अर्थम् च साधयेत्।

**अन्वयः** – क्षणशः (एव) विद्यां कणशः एव अर्थं च साधयेत्।

**भावार्थः** – ज्ञानं प्राप्तुं समयस्य निरन्तरम् उपयोगः करणीयः। एकस्य अपि क्षणस्य नाशः न करणीयः। एवम् एव यदि कोऽपि धनस्य सङ्ग्रहं कर्तुम् इच्छति तर्हि सः निरन्तरं रूप्यकस्य सङ्ग्रहणं कुर्यात्। '**क्षणत्यागे कुतो विद्या, कणत्यागे कुतो धनम्।**'




© NCERT not to be republished

**सुखार्थिनः कुतो विद्या, कुतो विद्यार्थिनः सुखम्॥५॥**

**पदच्छेदः** – सुखार्थिनः कुतः विद्या कुतः विद्यार्थिनः सुखम्।

**अन्वयः** – सुखार्थिनः विद्या कुतः (भवेत्), विद्यार्थिनः सुखं कुतः (भवेत्)।

**भावार्थः** – यः सदैव सुखम् इच्छति, परिश्रमं न करोति, अलसः अस्ति, सः कथं विद्यां प्राप्तुं शक्नोति? अतः यः ज्ञानं लब्धुम् इच्छति सः आलस्यं सुखं च त्यक्त्वा निरन्तरं विद्यार्जनं कुर्यात्।





**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥६॥**

**पदच्छेदः** – गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वयः।

**अन्वयः** – गुणिषु गुणाः (एव) पूजास्थानं (भवन्ति) लिङ्गं च न (भवति) वयः च न (भवति)।

**भावार्थः** – गुणानां सर्वदा एव आदरः भवति। गुणवान् जनः पुरुषः स्त्री वा भवेत्, बालः वृद्धः वा भवेत्, सः सर्वदा पूजनीयः एव भवति। आदरस्य कृते लिङ्गम् आयुः वा महत्त्वपूर्णं न भवति।



© NCERT not to be republished

## मा ब्रूहि दीनं वचः ॥७॥

**पदच्छेदः** – मा ब्रूहि दीनम् वचः।

**अन्वयः** – (त्वं) दीनं वचः मा ब्रूहि।

**भावार्थः** – समाजे सर्वविधाः जनाः भवन्ति। केचित् साहाय्यं कुर्वन्ति। केचित् केवलं विकत्थनं कुर्वन्ति, अतः स्वाभिमानी जनः यस्य कस्यापि पुरतः साहाय्यस्य याचनां न कुर्यात्।





## यस्तु क्रियावान् पुरुषः स विद्वान् ॥८॥

**पदच्छेदः** – यः तु क्रियावान् पुरुषः सः विद्वान्।

**अन्वयः** – यः तु क्रियावान् पुरुषः सः विद्वान् (भवति)।

**भावार्थः** – अर्जितस्य ज्ञानस्य जीवने आचरणेन, व्यवहारे च प्रयोगेण हि मनुष्यः वास्तविकः विद्वान् भवति न तु केवलम् अध्ययनेन। विद्या अनुकूल-कर्मणा विना व्यर्था भवति। 'ज्ञानं भारः क्रियां विना'।



© NCERT not to be republished

## शीलं परं भूषणम्॥९॥

**पदच्छेदः** – शीलम् परम् भूषणम्।

**अन्वयः** – शीलं परं भूषणम् (अस्ति)।

**भावार्थः** – मनुष्यस्य आचरणम् एव श्रेष्ठम् आभूषणम् अस्ति। सदाचारं विना अन्ये गुणाः निरर्थकाः भवन्ति।



© NCERT not to be republished

## हितं मनोहारि च दुर्लभं वचः ॥१०॥

**पदच्छेदः** – हितम् मनोहारि च दुर्लभम् वचः।

**अन्वयः** – हितं मनोहारि च वचः दुर्लभं (भवति)।

**भावार्थः** – केचन हितकारकं वचनं वदन्ति किन्तु तत् कठोरतया वदन्ति। केचन मनोरञ्जकं वाक्यं वदन्ति किन्तु तत् हितकारकं न भवति। तादृशं वचनं दुर्लभं भवति यत् हितकारकम् अपि स्यात्, मनोरमम् अपि स्यात्।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| चर | आचरणं कुरु | आचरण करो | (May you) follow | |
| इत्युक्ते | इति कथने | अर्थात् | It means | |
| कुतूहलम् | कौतुकम् | उत्सुकता | Curiosity | |
| भाण्डागारः | कोषः | भण्डार | Treasure-trove | |
| अन्विष्यति | अन्वेषणं करोति | ढूँढ़ता है | Searches | |
| मृग्यते | अन्विष्यते | ढूँढ़ा जाता है | Searches | |
| आद्यम् | प्रथमम् | पहला | First | |
| धर्मसाधनम् | येन धर्मसिद्धिः भवति | धर्म सिद्धि का साधन | Instrument for performing Dharma | |
| क्षणशः | क्षणे क्षणे | प्रत्येक पल में | Every moment | |
| कणशः | कणे कणे | प्रत्येक कण में | In every object and particle | |
| अर्थम् | वित्तम् | धन को | Wealth | |
| साधयेत् | सम्पादयेत् | अर्जन करना चाहिए | Should accomplish | |
| पणस्य | नाणकस्य | रूपये का | Of rupee | |
| सुखार्थिनः | सुखम् इच्छतः | सुख चाहने वाले का | Of the seekers of enjoyment | |
| पूजास्थानम् | श्रद्धायोग्यम् | वन्दनीय | Worthy of worship | |
| वयः | अवस्था | आयु | Age | |
| मा | न | मत | Do not | |
| ब्रूहि | वद | बोलो | May you tell | |
| दीनम् | दैन्यम् | दयनीय | Helpless | |
| विकत्थनम् | गर्ववाणी | मिथ्या आत्म-प्रशंसा | Boasting | |
| क्रियावान् | क्रियाशीलः | सक्रिय | Action-oriented | |
| शीलम् | आचरणम् | चरित्र | Character | |

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति वदन्तु लिखन्तु च —**

(क) किं वयं पृथिव्याः पुत्राः पुत्र्यः च स्मः? ........................

(ख) किं रत्नम् अन्विष्यति? ........................

(ग) किं शीलं श्रेष्ठम् आभूषणम् अस्ति? ........................

(घ) किं शरीरम् आद्यं धर्मसाधनम्? ........................

(ङ) किं गुणानां सर्वदा एव आदरः भवति? ........................

(च) किं क्रियाशीलः एव विद्वान् भवति? ........................

(छ) किम् अस्माभिः केवलं मनोरञ्जकानि वाक्यानि वक्तव्यानि? ........................

(ज) यः सदा सुखम् इच्छति, किं सः विद्यां प्राप्नोति? ........................

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) आद्यं धर्मसाधनं किम्? ........................

(ख) कीदृशं वचः मा ब्रूहि? ........................

(ग) श्रेष्ठम् आभूषणं किम् अस्ति? ........................

(घ) सर्वेषां मनुष्याणां माता का अस्ति? ........................

(ङ) रत्नानाम् अन्वेषणं के कुर्वन्ति? ........................

**३. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) कः विद्वान् अस्ति? ................................................................

(ख) गुणिषु पूजास्थानं किम्? ................................................................

(ग) कः विद्यां न प्राप्नोति? ................................................................

© NCERT not to be republished

(घ) मनुष्यः विद्याम् अर्थं च कथं साधयेत्? ..............................................

(ङ) कीदृशं वचनं दुर्लभम्? ..............................................

**४. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु—**

(क) शीलं परं भूषणम्। ..............................................

(ख) मनुष्यः पृथिव्याः सन्तानः अस्ति। ..............................................

(ग) गुणिषु लिङ्गं वयः च न महत्त्वपूर्णम्। ..............................................

(घ) हितकारकं मनोहारि च वचः दुर्लभं भवति। ..............................................

**५. पाठस्य आधारेण उदाहरणानुसारं समुचितं मेलनं कुर्वन्तु—**

| | | |
|---|---|---|
| (क) | क्षणशः कणशः साधयेत् | शरीरम् |
| (ख) | सर्वश्रेष्ठम् आभूषणम् | गुणाः |
| (ग) | रत्नं न अन्विष्यति, तत् | दुर्लभम् |
| (घ) | आद्यं धर्मसाधनम् | शीलम् |
| (ङ) | हितकारकं मनोहारि च वचः | विद्याम् अर्थं च |
| (च) | पूजास्थानम् | मृग्यते |

**६. पाठात् अधोलिखितानां पदानां समानार्थकपदानि चित्वा लिखन्तु—**

(क) सुतः ..........पुत्रः..........

(ख) प्रथमम् ..............................

(ग) धनम् ..............................

(घ) अवस्था ..............................

(ङ) वचनम् ..............................

(च) आचरणम् ..............................

© NCERT not to be republished

**७. उदाहरणानुसारम् अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विभक्तिं निर्दिशन्तु —**

(क) माता भूमिः पुत्रोऽहं पृथिव्याः। ..................षष्ठी विभक्तिः..................

(ख) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। ....................................

(ग) शीलं परं भूषणम्। ....................................

(घ) क्षणशः कणशश्चैव विद्याम् अर्थं च साधयेत्। ....................................

(ङ) सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्। ....................................

(च) हितं मनोहारि च दुर्लभं वचः। ....................................

**८. यत्र अग्रे स्वरः अस्ति तत्र अनुस्वारस्य स्थाने 'म्' लिखित्वा वाक्यानि पुनः लिखन्तु —**

(क) न रत्नं अन्विष्यति। ..........न रत्नम् अन्विष्यति।..........

(ख) शरीरं आद्यं खलु धर्मसाधनम्। ....................................

(ग) वयं अद्यतनं पाठं पठामः। ....................................

(घ) त्वं अस्माकं गृहं आगच्छ। ....................................

(ङ) अहं एकं प्रश्नं प्रष्टुं इच्छामि। ....................................

(च) गुणं अर्जयितुं अधिकं प्रयत्नं करोतु। ....................................



## योग्यताविस्तरः

**१. मकारलेखनम्** – यदा 'म'कारात् (म्) परं व्यञ्जनवर्णः भवति, तदा 'म'कारस्य (म्) स्थाने अनुस्वारः ( ं ) लेखनीयः। यदा 'म'कारात् (म्) परं स्वरवर्णः भवति, तदा 'म'कारः (म्) एव लेखनीयः।

यथा – **पुस्तकम् पठति = पुस्तकं पठति।**

**पुस्तकम् अपठत् = पुस्तकम् अपठत्।**

**२. सूक्तिः** – सु + उक्तिः। शोभना + उक्तिः = सूक्तिः इति कथ्यते। एतासु सूक्तिषु जीवनमूल्यानि सन्निहितानि भवन्ति। एताः सूक्तयः अस्मान् जीवने उन्नत्यर्थं प्रेरयन्ति। संस्कृतसाहित्यम् एताभिः सूक्तिभिः परिपूर्णम् अस्ति।

© NCERT not to be republished

३. अत्र एताः सूक्तयः विविधेभ्यः ग्रन्थेभ्यः संगृहीताः। तेषां ग्रन्थानां संक्षिप्तः परिचयः अत्र दीयते –

- **अथर्ववेदः** – अथर्ववेदः चतुर्षु वेदेषु अन्यतमः अस्ति। अस्मिन् विविधाः स्तुतयः, अर्थशास्त्रं, चिकित्साशास्त्रं, तन्त्रविद्या, विज्ञानं, दर्शनं च वर्णितमस्ति।
- **कुमारसम्भवम्** – महाकविः कालिदासः अस्य ग्रन्थस्य रचयिता। कुमारसम्भवे शिवपार्वत्योः विवाहस्य, कुमारस्य कार्तिकेयस्य च जन्मनः कथा वर्णिता अस्ति।
- **पञ्चतन्त्रम्** – अस्य नीतिग्रन्थस्य लेखकः विष्णुशर्मा अस्ति। अस्मिन् ग्रन्थे पञ्च प्रकरणानि सन्ति। यत्र पशुपक्षिणां कथामाध्यमेन नैतिकशिक्षा प्रदत्ता।
- **उत्तररामचरितम्** – संस्कृतनाटकेषु सुप्रसिद्धस्य अस्य नाटकस्य रचयिता महाकविः भवभूतिः अस्ति। अस्मिन् नाटके भगवतः श्रीरामस्य राज्याभिषेकोत्तरस्य जीवनस्य चरितं वर्णितम् अस्ति।
- **नीतिशतकम्** – उज्जयिन्याः नृपः भर्तृहरिः संस्कृतस्य महान् कविः आसीत्। सः त्रीणि शतककाव्यानि रचितवान्। तेन रचितं नीतिशतकं नीतिशास्त्रस्य प्रसिद्धः ग्रन्थः अस्ति।
- **किरातार्जुनीयम्** – संस्कृतकाव्यपरम्परायां किरातार्जुनीयम् इति विशिष्टं महाकाव्यम् अस्ति। सुप्रसिद्धः महाकविः भारविः अस्य लेखकः अस्ति। अस्मिन् ग्रन्थे किरातवेशधारिणः शिवस्य अर्जुनस्य च कथा वर्णिता अस्ति।

© NCERT not to be republished



## परियोजनाकार्यम्

**१. अन्तर्जालस्य (Internet) साहाय्येन एतादृशीनां प्रेरणादायिकानां दशानां सूक्तीनां सङ्ग्रहणं कृत्वा भित्तिपत्रम् एकं रचयन्तु।**

**२. स्वमातृभाषायां प्रसिद्धाः कतिचन सूक्तीः लिखन्तु।**

**३. एताः सूक्तीः पठित्वा भवतां मनसि कः विचारः उत्पद्यते इति स्वभाषया लिखन्तु।**



## कार्यकलापः

**एताः सूक्तीः कण्ठस्थीकृत्य कक्षायां श्रावयन्तु।**

नवमः पाठः

# अन्नाद् भवन्ति भूतानि

0772CH09

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः च। भारतस्य विशिष्टं प्राचीनं ज्ञानं संस्कृताश्रितं वर्तते। संस्कृतिः अपि संस्कृताश्रिता भवति। अस्माकं प्राचीनाः ऋषिमुनयः, विद्वांसः, गणितज्ञाः, खगोलविज्ञानिनः, भूगर्भशास्त्रज्ञाः, शिल्पकलाप्रवराः, सङ्गीत-नाट्य-कलाविशारदाः, तन्त्रज्ञाननिपुणाः, आयुर्वेदादिवैद्यशास्त्रधुरन्धराः, जल-वायु-प्रकृति-वातावरणज्ञाः, वास्तु-स्थापत्यकलाप्रवराः, जीवशास्त्रस्य, रसायनशास्त्रस्य, लोहशास्त्रस्य च विज्ञातारः, राजनीतिज्ञाः, अर्थशास्त्रज्ञाः, मनोविज्ञानिनः, तर्कनिष्णातारः, पाकशास्त्रविशिष्टाः, सौन्दर्यशास्त्रज्ञाः, नीतिशास्त्रनिपुणाः, विधिविधानपारङ्गताः, धर्मशास्त्रप्रवीणाः, सृष्टिविज्ञानज्ञाः आचार्याः भारतवर्षस्य यशः चतसृषु दिक्षु विस्तारितवन्तः। अधुना अपि संस्कृतग्रन्थान् आश्रित्य अनेके जनाः वैज्ञानिकाः शोधं कुर्वन्तः सन्ति। भारतीय-दर्शन-शास्त्रेषु सृष्टेः उत्पत्तिविषये नैके विचाराः प्रतिपादिताः सन्ति। एतादृशाः प्रमुखाः विचाराः वैदिकवाङ्मये लौकिकवाङ्मये च वर्तन्ते। तेषु सृष्टिक्रमस्य विषये वयं पठामः।



**पुत्री** – अम्ब ! मम काचिद् जिज्ञासा अस्ति। वयं मनुष्याः प्राणिनः कीटाः च कथं भूलोके आगताः ?

**माता** – वत्से ! तदर्थं भवती प्रथमं पृथिव्याः उत्पत्तिक्रमं जानीयात्।

**पुत्री** – अहो ! रोचकं स्यात् कृपया श्रावयतु।

**माता** – अस्तु ! प्रथमं ब्रह्मणः आकाशस्य उत्पत्तिः अभवत्।

**पुत्री** – ब्रह्म इत्युक्ते किम् अम्ब ?

**माता** – ब्रह्म इत्युक्ते चेतना-शक्तिः, ऊर्जा वा या सर्वत्र व्याप्ता अस्ति। यथा – आकाशः अणुः च सर्वत्र व्याप्तः अस्ति।



© NCERT not to be republished



**पुत्री** – अनन्तरम् ?

**माता** – आकाशात् वायुः उत्पन्नः।

**पुत्री** – अम्ब ! पृथिवी कदा उत्पन्ना ?

**माता** – शृणोतु, वदामि। वायोः अग्निः उत्पन्नः।

**पुत्री** – एतत् सर्वं किमर्थम् अम्ब ? साक्षात् मनुष्याणाम् उत्पत्तिं वदतु।

**माता** – अयि वत्से ! एतत् सर्वं नास्ति चेत् कथं मनुष्याः प्राणिनः वा जीवन्ति ?

**पुत्री** – जलम् आहारः वायुः च अस्ति चेत् पर्याप्तं खलु !

**माता** – आम्, अतः तेषामपि उत्पत्तिं जानातु।

**पुत्री** – तर्हि अग्नेः कस्य उत्पत्तिः अभवत् ?

**माता** – अग्नेः जलस्य उत्पत्तिः अभवत्।

**पुत्री** – जलात् मनुष्यस्य उत्पत्तिः खलु ?

**माता** – नैव वत्से ! जलात् पृथिव्याः उत्पत्तिः अभवत्।

**पुत्री** – अहो ! सत्यम्, अहं विस्मृतवती एव। पृथिव्याः तु प्राणिनः मनुष्याः च उत्पन्नाः।

**माता** – नहि नहि, पृथिव्याः ओषधीनां सस्यानां वृक्षादीनां च उत्पत्तिः अभवत्।

**पुत्री** – अहो अद्भुतम् !

**माता** – सस्येभ्यः आहारस्य उत्पत्तिः अभवत्।

**पुत्री** – आम्, आहारस्य उत्पत्तेः परं भूमौ सर्वमपि आगतम् एव। आहारात् कीटाः, प्राणिनः, मनुष्याः उत्पन्नाः खलु अम्ब ?



© NCERT not to be republished

**माता** – अहो ! मम पुत्री बहु चतुरा अस्ति। सत्यम् उक्तवती भवती।

**पुत्री** – अम्ब ! भवती एतत् सर्वं कथं जानाति ?

**माता** – अहम् आधुनिकं रसायनशास्त्रम् उपनिषद्-ग्रन्थान् च पठितवती।

**पुत्री** – अहो ! अहमपि उपनिषदं पठामि अम्ब !

**माता** – सत्यं वत्से ! अवश्यम् उपनिषद्-ग्रन्थाः पठनीयाः। यतः अस्माकं भारतस्य मौलिकं ज्ञानं तेषु निहितम् अस्ति। तेन अस्माकं जीवनस्य अपि उत्कर्षः भवति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| भूतानि | प्राणिनः | समस्त प्राणिगण | All Living being | |
| अम्ब ! | भोः मातः ! | माँ ! | O Mother ! | |
| ब्रह्म | समष्टि-चिति-शक्तिः / सर्वव्याप्तः परमेश्वरः | सर्वत्र व्याप्त चेतन शक्ति व ऊर्जा/सृष्टिकर्ता | Omnipresent Conscious Power & Energy | |
| ब्रह्मणः | सर्वव्याप्त-परमेश्वरात् | सृष्टिकर्ता से | From Universal Power & Creater | |
| काचित् | का अपि | कोई | Some one | |
| जिज्ञासा | ज्ञातुम् इच्छा | जानने की इच्छा | Curiosity | |
| तदर्थम् | अतः | इसलिए | For that matter | |
| उत्पत्तिक्रमम् | उत्पत्तेः क्रमम् | उत्पत्ति का क्रम | Order of origin | |
| जानीयात् | अवगच्छेत् | जानना चाहिए | Should know | |
| वत्से ! | हे पुत्रि ! | बेटी ! | Dear daughter! | |
| अग्नेः | वह्नेः | आग से | From Fire | |
| विस्मृतवती | न स्मृतवती | भूल गयी | Forgot | |
| ओषधीनाम् | औषधोपयोगि-पादपानाम् | जड़ी-बूटियों का | Of herbs | |
| उक्तवती | अवदत् | बोली | She said | |
| पठनीयम् | पठेत् | पढ़ना चाहिए | Should be read | |
| रसायनशास्त्रम् | रसशास्त्रम् | रसायनशास्त्र | Chemistry | |

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

(क) पुत्र्याः जिज्ञासा का?

(ख) कस्मात् आकाशस्य उत्पत्तिः अभवत्?

(ग) अग्नेः कस्य उत्पत्तिः अभवत्?

(घ) पृथिव्याः केषाम् उत्पत्तिः अभवत्?

(ङ) आहारात् के उत्पन्नाः?

(च) माता किं किं पठितवती?

**२. पाठं पठित्वा रिक्तस्थानेषु समुचितं पदं लिखन्तु—**

(क) अम्ब! मम काचिद् .................................... अस्ति।

(ख) प्रथमं .................................... आकाशस्य उत्पत्तिः अभवत्।

(ग) साक्षात् .................................... उत्पत्तिं वदतु।

(घ) .................................... कीटाः, प्राणिनः, मनुष्याः उत्पन्नाः खलु अम्ब?

(ङ) अहम् आधुनिकं .................................... .................................... च पठितवती।

(च) अस्माकं .................................... ज्ञानं तेषु एव निहितम् अस्ति।

**३. उदाहरणानुसारम् अधः प्रदत्तानां शब्दानां वचनपरिवर्तनं कुर्वन्तु—**

| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| आहार | आहारात् | आहाराभ्याम् | आहारेभ्यः |
| मनुष्य | .............................. | .............................. | .............................. |
| वृक्ष | .............................. | .............................. | .............................. |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| **अग्नि** | अग्नेः | अग्निभ्याम् | अग्निभ्यः |
| **मुनि** | ............................ | ............................ | ............................ |
| **पेटिका** | पेटिकायाः | पेटिकाभ्याम् | पेटिकाभ्यः |
| **वाटिका** | ............................ | ............................ | ............................ |
| **माला** | ............................ | ............................ | ............................ |
| **कूपी** | कूप्याः | कूपीभ्याम् | कूपीभ्यः |
| **नदी** | ............................ | ............................ | ............................ |
| **नगरी** | ............................ | ............................ | ............................ |

**४. उदाहरणानुसारम् अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु —**

(क) माता **आपणात्** गृहम् आगच्छति। – माता **कुतः** गृहम् आगच्छति?

– माता **कस्मात्** गृहम् आगच्छति?

(ख) राजेशः **विद्यालयात्** पुस्तकम् आनयति। – ............................................................

– ............................................................

(ग) विकासः **महेशात्** लेखनीं स्वीकृतवान्। – ............................................................

– ............................................................

(घ) माता **गृहात्** पुत्रं पश्यति। – ............................................................

– ............................................................

(ङ) **हिमालयात्** गङ्गा प्रवहति। – ............................................................

– ............................................................

© NCERT not to be republished

५. **अधः प्रदत्तानि पदानि पठन्तु, तेषां पदानां पर्यायपदानि पाठेषु सन्ति, तानि चित्वा निर्देशानुसारं पदरञ्जन्यां लिखन्तु—**

| | | | | | |
|---|---|---|---|---|---|
| १ उ | त्प | त्तिः | २ | | ■ |
| त्क | ■ | ■ | | ३ | |
| र्षः | ६ | | | | ४ |
| ■ | | ■ | | | |
| ८ | | ■ | ५ | | |
| | | ■ | | ७ | |

**वामतः दक्षिणम्**

| | | |
|---|---|---|
| (१) | जन्म | (त्रीणि अक्षराणि) |
| (२) | मातः | (अक्षरद्वयम्) |
| (३) | सत्यम् | (अक्षरद्वयम्) |
| (४) | अपि | (एकम् अक्षरम्) |
| (५) | ओषधीनाम् | (त्रीणि अक्षराणि) |
| (६) | तदर्थम् | (अक्षरद्वयम्) |
| (७) | कस्मिन् समये | (अक्षरद्वयम्) |

**उपरिष्टात् अधः**

| | | |
|---|---|---|
| (१) | उन्नतिः | (त्रीणि अक्षराणि) |
| (२) | समाप्तम् | (चत्वारि अक्षराणि) |
| (३) | गगनस्य | (चत्वारि अक्षराणि) |
| (४) | बुद्धिमती | (त्रीणि अक्षराणि) |
| (५) | सकलम् | (अक्षरद्वयम्) |
| (६) | ततः परम् | (चत्वारि अक्षराणि) |
| (८) | किल | (अक्षरद्वयम्) |

६. **उदाहरणानुसारं कः कस्मात् विद्यां प्राप्तवान् इति पूर्णवाक्येन लिखन्तु—**

| | **शिष्यः** | | **आचार्यः** | | |
|---|---|---|---|---|---|
| (क) | शुक्राचार्यः | – | महादेवः | – | शुक्राचार्यः महादेवात् विद्यां प्राप्तवान्। |
| (ख) | पद्मपादः | – | शङ्कराचार्यः | – | ................................ |
| (ग) | विवेकानन्दः | – | रामकृष्णः | – | ................................ |
| (घ) | रामः | – | वसिष्ठः | – | ................................ |

© NCERT not to be republished

(घ) भीष्मः – परशुरामः – ..............................................................................

(ङ) चन्द्रगुप्तः – चाणक्यः – ..............................................................................

(च) अर्जुनः – द्रोणाचार्यः – ..............................................................................

७. **अधः प्रदत्तानि वाक्यानि पठित्वा मातृभाषया / प्रान्तीयभाषया/ आङ्ग्लभाषया वा अनुवादं कुर्वन्तु—**

(क) राधा नगरात् आगच्छति। ..............................................................................

(ख) विनयः वृक्षात् पुष्पाणि चिनोति। ..............................................................................

(ग) सन्दीपः कार्यालयात् गृहं गतवान्। ..............................................................................

(घ) भगिनी दूरात् वाहनं पश्यति। ..............................................................................

(ङ) महेशः शालायाः गृहम् आगतवान्। ..............................................................................

(च) बालः कपाटिकायाः धनं स्वीकरोति। ..............................................................................



## योग्यताविस्तरः

### अत्र इदम् अवधेयम्

तस्माद्वा एतस्मात् आत्मनः आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधिभ्योऽन्नम्। अन्नात् पुरुषः॥

*– तैत्तिरीयोपनिषत् २-१-२*

© NCERT not to be republished

# आधुनिकरसायनशास्त्रम् (Chemistry)

## द्रव्यानां-स्थितय: (States of Matter)





## परियोजनाकार्यम्

१. भारतस्य गणितज्ञानां प्राचीनविज्ञानिनां खगोलविज्ञानिनां चित्राणि सङ्गृह्य अध: तेषां नामानि लिखित्वा एकं भित्तिपत्रं कुर्वन्तु।

२. प्राचीनभारतस्य राज्यानां नामानि, तेषाम् आधुनिकनामानि च लिखन्तु।
यथा – इन्द्रप्रस्थ: — देहली, कर्णपुरम् — कानपुर

३. मातृभाषायां प्रान्तीयभाषायां वा पदरञ्जन्या: (SUDOKU) निर्माणं कुर्वन्तु।

४. कक्षायां संस्कृतस्य वस्तुप्रदर्शिन्या: आयोजनं कुर्वन्तु।

५. भवत: अथवा परिवारजनानां जन्मदिनोत्सवे न्यूनाति-न्यूनम् एकस्य वृक्षस्य आरोपणं कुर्वन्तु। प्रतिदिनं जलेन सिञ्चन्तु।

© NCERT not to be republished

## दशमः पाठः

# दशमः कः ?

0772CH10




© NCERT not to be republished


अस्तु तस्याः अपि अभिनन्दनम्।
अन्ये केऽपि किमपि स्थानं प्राप्तवन्तः किम्?
महोदय! अहं पञ्चमी अस्मि।
महोदय! अहं चतुर्थः अस्मि।
महोदय! अहं नवमी अस्मि।
अहो उत्तमम्। भवद्भ्यः सर्वेभ्यः आशीर्वादाः। तर्हि दशमः कोऽस्ति भोः?
दशमस्य विषये वयं न जानीमः श्रीमन्!
चिन्ता मास्तु, वयम् अद्य दशमस्य विषये एकां कथां पठामः।



एकदा दश बालकाः स्नानाय नदीम् अगच्छन्। ते नदीजले चिरं स्नानम् अकुर्वन्। ततः ते तीर्त्वा पारं गताः। तदा तेषां नायकः अपृच्छत् – अपि सर्वे बालकाः नदीम् उत्तीर्णाः ? तदा कश्चित् बालकः सर्वान् पङ्क्तौ स्थापयित्वा अगणयत् – एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव इति। सः आत्मानं न अगणयत्। अतः सः अवदत् - अरे वयं नव एव स्मः भोः ! दशमः नास्ति। अपरः अपि बालकः पुनः आत्मानं त्यक्त्वा अन्यान् बालकान् अगणयत्। तदा अपि नव एव आसन्। अतः ते निश्चयम् अकुर्वन् यत् दशमः नद्यां मग्नः। ते विषण्णाः तूष्णीम् अतिष्ठन्।

तदा कश्चित् पथिकः तत्र आगच्छत्। सः तान् बालकान् दुःखितान् दृष्ट्वा अपृच्छत् – अयि बालकाः ! युष्माकं दुःखस्य कारणं किम्? बालकानां नायकः अकथयत् "वयं दश बालकाः स्नातुम् आगताः। इदानीं नव एव स्मः। एकः नद्यां मग्नः" इति।

पथिकः तान् अगणयत्। तत्र दश बालकाः तु आसन्। सः नायकम् आदिशत् त्वं बालकान् गणय। सः नव बालकान् एव अगणयत्। तदा पथिकः अवदत् – दशमः त्वम् असि इति। तत् श्रुत्वा सर्वे प्रहृष्टाः भूत्वा अकथयन् – दशमः प्राप्तः दशमः प्राप्तः इति। ततः सर्वे मिलित्वा आनन्देन गृहम् अगच्छन्।



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| तीर्त्वा | सन्तरणं कृत्वा | तैरकर | Having Swum | |
| स्नानाय | स्नाननिमित्तम् | नहाने के लिए | For bathing | |
| चिरम् | बहुकालपर्यन्तम् | देर तक | For a long time | |
| उत्तीर्णाः | पारं गताः | पार हुए | Crossed over | |
| अपरः | अन्यः | दूसरा | Another | |
| स्वम् | आत्मानम् | स्वयं को | Oneself | |
| मग्नः | विलीनः | डूब गया | Drowned | |
| विषण्णाः | खिन्नाः | दुःखी हुए | Saddened | |
| तूष्णीम् | निःशब्दम् | मौन | Silent | |
| पथिकः | मार्गगन्ता | यात्री | Traveller | |
| अगणयत् | गणनां कृतवान् | गिना | Counted | |
| प्रहृष्टाः | आनन्दिताः | प्रसन्न | Delighted | |
| कतमः | कियत्-संख्यात्मकः | कौन-सा | Which one | |

### अत्र इदम् अवधेयम्

संख्यावाचक-शब्दानां पूरणार्थे '**प्रथमः**', '**द्वितीयः**', '**तृतीयः**' इत्यादिशब्दाः भवन्ति।

यथा – एकम् → पूरणार्थे = **प्रथमः** / **प्रथमा** / **प्रथमम्**।

द्वे → पूरणार्थे = **द्वितीयः** / **द्वितीया** / **द्वितीयम्**।

त्रीणि → पूरणार्थे = **तृतीयः** / **तृतीया** / **तृतीयम्** इत्यादयः।



## वयम् अभ्यासं कुर्मः

**१. कोष्ठकात् समीचीनम् उत्तरं चित्वा लिखन्तु —**

(क) कति बालकाः स्नातुं गताः ? (पञ्च, द्वादश, दश)

(ख) कतमः बालकः नद्यां मग्नः इति निश्चयम् अकुर्वन् ? (प्रथमः, दशमः, पञ्चमः)

© NCERT not to be republished

(ग) दशमः कः आसीत्? (नायकः, पथिकः, नदी)

(घ) कः सम्यक् रूपेण बालकान् गणितवान्? (नायकः, पथिकः, बालकः)

(ङ) बालकाः कां तीर्त्वा पारं गताः? (पुष्करिणीम्, समुद्रम्, नदीम्)

२. **पाठस्य आधारेण एकवाक्येन प्रश्नानाम् उत्तराणि लिखन्तु—**

(क) दश बालकाः किमर्थं नदीम् अगच्छन्?

(ख) नायकः किम् अपृच्छत्?

(ग) बालकाः स्नानाय कुत्र अगच्छन्?

(घ) बालकाः किं निश्चयम् अकुर्वन्?

(ङ) बालकाः कथं गृहम् अगच्छन्?

३. **पट्टिकातः उचितं विशेषणपदं योजयित्वा वाक्यानि रचयन्तु—**

**अङ्गुलयः**




| प्रथमा | द्वितीया | तृतीया | चतुर्थी | पञ्चमी |
|---|---|---|---|---|

(क) करे .................................................. अङ्गुलिः भवति तर्जनी।

(ख) अनामिका .................................................. अङ्गुलिः भवति।

(ग) करे .................................................. अङ्गुलिः भवति अङ्गुष्ठः।

(घ) कनिष्ठिका .................................................. अङ्गुलिः भवति।

(ङ) करे .................................................. अङ्गुलिः भवति मध्यमा।

© NCERT not to be republished

४. **पट्टिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु —**

**सप्ताहः**

| | | |
|---|---|---|
| प्रथमः दिवसः | – | रविवासरः |
| द्वितीयः दिवसः | – | सोमवासरः |
| तृतीयः दिवसः | – | मङ्गलवासरः |
| चतुर्थः दिवसः | – | बुधवासरः |
| पञ्चमः दिवसः | – | गुरुवासरः |
| षष्ठः दिवसः | – | शुक्रवासरः |
| सप्तमः दिवसः | – | शनिवासरः |



(क) सप्ताहस्य प्रथमः दिवसः कः ? ..............................................

(ख) सप्ताहस्य कतमः दिवसः रविवासरः अस्ति ? ..............................................

(ग) सप्ताहस्य षष्ठः दिवसः कः ? ..............................................

(घ) सप्ताहस्य कतमः दिवसः शनिवासरः अस्ति ? ..............................................

(ङ) सप्ताहस्य अन्तिमः दिवसः कः अस्ति ? ..............................................

५. **वाटिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु —**

**भारतीय-द्वादशमासाः**




(क) मासेषु पञ्चमः मासः कः ? ..............................................

(ख) मार्गशीर्षः कतमः मासः अस्ति ? ..............................................

(ग) मासेषु दशमः मासः कः ? ..............................................

© NCERT not to be republished

(घ) कार्त्तिकः कतमः मासः अस्ति ? ..............................................

(ङ) मासेषु अन्तिमः मासः कः ? ..............................................

## ६. मञ्जूषां पश्यन्तु, उत्तरं लिखन्तु —




(क) आङ्ग्लमासेषु दशमः मासः ..............................................

(ख) फरवरीमासः .............................................. मासः अस्ति।

(ग) आङ्ग्लमासेषु अष्टमः मासः ..............................................

(घ) सितम्बरमासः .............................................. मासः अस्ति।

(ङ) आङ्ग्लमासेषु अन्तिमः मासः ..............................................

## ७. अधोलिखिते गद्यांशे अङ्कानां स्थाने संख्यावाचकशब्दान् लिखन्तु —

यथा – (१) पाठशाला – एका पाठशाला

.............................. (१) पाठशाला अस्ति। तत्र .............................. (३) अध्यापकाः सन्ति। साहित्यकक्षायां .............................. (२०) छात्राः सन्ति। एकस्मिन् दिने .............................. (१) निरीक्षकः आगतवान्। तस्मिन् दिने साहित्यकक्षायां .............................. (१५) छात्राः उपस्थिताः। .............................. (५) अनुपस्थिताः। निरीक्षकः .............................. (१०) शब्दान् लेखितुम् उक्तवान्। .............................. (२) छात्रौ .............................. (७) शब्दान् सम्यक् लिखितवन्तौ। .............................. (१) छात्रः सर्वान् अपि .............................. (१०) शब्दान् सम्यक् लिखितवान्। अवशिष्टाः .............................. (१२) छात्राः .............................. (९) शब्दान् सम्यक् लिखितवन्तः।



© NCERT not to be republished



## योग्यताविस्तरः

### १. संख्येयशब्दाः

| संख्या | | पूरणशब्दाः | | | | | |
|---|---|---|---|---|---|---|---|
| | | पुं. | | स्त्री. | | नपुं. | |
| एकम् | १ | प्रथमः | $\text{१}^{\text{मः}}$ | प्रथमा | $\text{१}^{\text{मा}}$ | प्रथमम् | $\text{१}^{\text{मम्}}$ |
| द्वे | २ | द्वितीयः | $\text{२}^{\text{यः}}$ | द्वितीया | $\text{२}^{\text{या}}$ | द्वितीयम् | $\text{२}^{\text{यम्}}$ |
| त्रीणि | ३ | तृतीयः | $\text{३}^{\text{यः}}$ | तृतीया | $\text{३}^{\text{या}}$ | तृतीयम् | $\text{३}^{\text{यम्}}$ |
| चत्वारि | ४ | चतुर्थः | $\text{४}^{\text{थः}}$ | चतुर्थी | $\text{४}^{\text{थी}}$ | चतुर्थम् | $\text{४}^{\text{र्थम्}}$ |
| पञ्च | ५ | पञ्चमः | $\text{५}^{\text{मः}}$ | पञ्चमी | $\text{५}^{\text{मी}}$ | पञ्चमम् | $\text{५}^{\text{मम्}}$ |
| षट् | ६ | षष्ठः | $\text{६}^{\text{ठः}}$ | षष्ठी | $\text{६}^{\text{ठी}}$ | षष्ठम् | $\text{६}^{\text{ष्ठम्}}$ |
| सप्त | ७ | सप्तमः | $\text{७}^{\text{मः}}$ | सप्तमी | $\text{७}^{\text{मी}}$ | सप्तमम् | $\text{७}^{\text{मम्}}$ |
| अष्ट | ८ | अष्टमः | $\text{८}^{\text{मः}}$ | अष्टमी | $\text{८}^{\text{मी}}$ | अष्टमम् | $\text{८}^{\text{मम्}}$ |
| नव | ९ | नवमः | $\text{९}^{\text{मः}}$ | नवमी | $\text{९}^{\text{मी}}$ | नवमम् | $\text{९}^{\text{मम्}}$ |
| दश | १० | दशमः | $\text{१०}^{\text{मः}}$ | दशमी | $\text{१०}^{\text{मी}}$ | दशमम् | $\text{१०}^{\text{मम्}}$ |
| | | | | | | | |
| एकादश | ११ | एकादशः | $\text{११}^{\text{शः}}$ | एकादशी | $\text{११}^{\text{शी}}$ | एकादशम् | $\text{११}^{\text{शम्}}$ |
| द्वादश | १२ | द्वादशः | $\text{१२}^{\text{शः}}$ | द्वादशी | $\text{१२}^{\text{शी}}$ | द्वादशम् | $\text{१२}^{\text{शम्}}$ |
| त्रयोदश | १३ | त्रयोदशः | $\text{१३}^{\text{शः}}$ | त्रयोदशी | $\text{१३}^{\text{शी}}$ | त्रयोदशम् | $\text{१३}^{\text{शम्}}$ |
| चतुर्दश | १४ | चतुर्दशः | $\text{१४}^{\text{शः}}$ | चतुर्दशी | $\text{१४}^{\text{शी}}$ | चतुर्दशम् | $\text{१४}^{\text{शम्}}$ |
| पञ्चदश | १५ | पञ्चदशः | $\text{१५}^{\text{शः}}$ | पञ्चदशी | $\text{१५}^{\text{शी}}$ | पञ्चदशम् | $\text{१५}^{\text{शम्}}$ |
| षोडश | १६ | षोडशः | $\text{१६}^{\text{शः}}$ | षोडशी | $\text{१६}^{\text{शी}}$ | षोडशम् | $\text{१६}^{\text{शम्}}$ |
| सप्तदश | १७ | सप्तदशः | $\text{१७}^{\text{शः}}$ | सप्तदशी | $\text{१७}^{\text{शी}}$ | सप्तदशम् | $\text{१७}^{\text{शम्}}$ |
| अष्टादश | १८ | अष्टादशः | $\text{१८}^{\text{शः}}$ | अष्टादशी | $\text{१८}^{\text{शी}}$ | अष्टादशम् | $\text{१८}^{\text{शम्}}$ |
| नवदश | १९ | नवदशः | $\text{१९}^{\text{शः}}$ | नवदशी | $\text{१९}^{\text{शी}}$ | नवदशम् | $\text{१९}^{\text{शम्}}$ |
| विंशतिः | २० | विंशः | $\text{२०}^{\text{शः}}$ | विंशी | $\text{२०}^{\text{शी}}$ | विंशम् | $\text{२०}^{\text{शम्}}$ |

© NCERT not to be republished

## २. संख्या (एकतः शतपर्यन्तम्)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | एकम् | ११ | एकादश | २१ | एकविंशतिः | ३१ | एकत्रिंशत् | ४१ | एकचत्वारिंशत् |
| २ | द्वे | १२ | द्वादश | २२ | द्वाविंशतिः | ३२ | द्वात्रिंशत् | ४२ | द्विचत्वारिंशत् |
| ३ | त्रीणि | १३ | त्रयोदश | २३ | त्रयोविंशतिः | ३३ | त्रयस्त्रिंशत् | ४३ | त्रिचत्वारिंशत् |
| ४ | चत्वारि | १४ | चतुर्दश | २४ | चतुर्विंशतिः | ३४ | चतुस्त्रिंशत् | ४४ | चतुश्चत्वारिंशत् |
| ५ | पञ्च | १५ | पञ्चदश | २५ | पञ्चविंशतिः | ३५ | पञ्चत्रिंशत् | ४५ | पञ्चचत्वारिंशत् |
| ६ | षट् | १६ | षोडश | २६ | षड्विंशतिः | ३६ | षड्त्रिंशत् | ४६ | षड्चत्वारिंशत् |
| ७ | सप्त | १७ | सप्तदश | २७ | सप्तविंशतिः | ३७ | सप्तत्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| ८ | अष्ट | १८ | अष्टादश | २८ | अष्टाविंशतिः | ३८ | अष्टत्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| ९ | नव | १९ | नवदश | २९ | नवविंशतिः | ३९ | नवत्रिंशत् | ४९ | नवचत्वारिंशत् |
| १० | दश | २० | विंशतिः | ३० | त्रिंशत् | ४० | चत्वारिंशत् | ५० | पञ्चाशत् |
| ५१ | एकपञ्चाशत् | ६१ | एकषष्टिः | ७१ | एकसप्ततिः | ८१ | एकाशीतिः | ९१ | एकनवतिः |
| ५२ | द्विपञ्चाशत् | ६२ | द्विषष्टिः | ७२ | द्विसप्ततिः | ८२ | द्व्यशीतिः | ९२ | द्विनवतिः |
| ५३ | त्रिपञ्चाशत् | ६३ | त्रिषष्टिः | ७३ | त्रिसप्ततिः | ८३ | त्र्यशीतिः | ९३ | त्रिनवतिः |
| ५४ | चतुःपञ्चाशत् | ६४ | चतुष्षष्टिः | ७४ | चतुस्सप्ततिः | ८४ | चतुरशीतिः | ९४ | चतुर्णवतिः |
| ५५ | पञ्चपञ्चाशत् | ६५ | पञ्चषष्टिः | ७५ | पञ्चसप्ततिः | ८५ | पञ्चाशीतिः | ९५ | पञ्चनवतिः |
| ५६ | षट्पञ्चाशत् | ६६ | षट्षष्टिः | ७६ | षट्सप्ततिः | ८६ | षडशीतिः | ९६ | षण्णवतिः |
| ५७ | सप्तपञ्चाशत् | ६७ | सप्तषष्टिः | ७७ | सप्तसप्ततिः | ८७ | सप्ताशीतिः | ९७ | सप्तनवतिः |
| ५८ | अष्टपञ्चाशत् | ६८ | अष्टषष्टिः | ७८ | अष्टसप्ततिः | ८८ | अष्टाशीतिः | ९८ | अष्टनवतिः |
| ५९ | नवपञ्चाशत् | ६९ | नवषष्टिः | ७९ | नवसप्ततिः | ८९ | नवाशीतिः | ९९ | नवनवतिः |
| ६० | षष्टिः | ७० | सप्ततिः | ८० | अशीतिः | ९० | नवतिः | १०० | शतम् |

© NCERT not to be republished

३. **संकटनाशनं श्रीगणेशस्तोत्रं पठन्तु गायन्तु च।**

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्॥
भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये॥१॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्॥
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्॥२॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च॥
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम्॥३॥

नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम्॥४॥





## परियोजनाकार्यम्

१. **पाठ्यपुस्तकस्य पाठानुक्रमणिकां दृष्ट्वा प्रथमपाठतः दशमपाठपर्यन्तं पूरणप्रत्ययान्तशब्दैः क्रमशः पाठानां नामानि लिखन्तु।**

२. **सारिण्यां विद्यमानानां संख्यापदानाम् अभ्यासं कुर्वन्तु।**

| संख्या | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| १ | एकः | एका | एकम् |
| २ | द्वौ | द्वे | द्वे |
| ३ | त्रयः | तिस्रः | त्रीणि |
| ४ | चत्वारः | चतस्रः | चत्वारि |
| ५ | पञ्च | पञ्च | पञ्च |

**पञ्चतः आरभ्य संख्याशब्दानां त्रिषु लिङ्गेषु समानरूपाणि भवन्ति।**

© NCERT not to be republished

एकादशः पाठः

# द्वीपेषु रम्यः द्वीपोऽण्डमानः

0772CH11






**अध्यापिका** – (*भारतस्य मानचित्रे अण्डमान-द्वीपसमूहं दर्शयन्ती*) एषः भारतस्य अष्टसु केन्द्रशासितप्रदेशेषु अन्यतमः अण्डमान-द्वीपसमूहः अस्ति। एतस्य राजधानी 'श्रीविजयपुरम्' अस्ति। पूर्वम् आङ्ग्लशासनेन अस्य नाम 'पोर्ट-ब्लेयर्' इति दत्तम् आसीत्।

**सर्वे उत्साहिताः बालाः** – महोदये! वयम् एतस्य विषये किञ्चित् अधिकं ज्ञातुम् इच्छामः।

**अध्यापिका** – अस्तु। भोः सूर्यांश! भवान् किमपि वक्तुम् इच्छति? इतिप्रतिभाति।

**सूर्यांशः** – सत्यं महोदये! ह्यः भवती एतस्य पाठस्य विषये सङ्केतं दत्तवती। तदा अहं गृहं गत्वा जालपुटे एतस्य अन्वेषणम् अकरवम्।

**अध्यापिका** – समीचीनं सूर्यांश! भवान् किम् अन्विष्टवान् तत्र?

**सूर्यांशः** – महोदये! रामायणकाले अस्य द्वीपस्य नाम 'हण्डुकमान्' आसीत्। एषः शब्दः प्रायः 'हनूमान्' इति शब्दस्य परिवर्तितं रूपम्। प्रथमशताब्द्याम् अस्य नाम 'अगादेमन्' इति आसीत्। ततः परं 'अङ्गादेमन्' जातम् इति सर्वकारस्य आधिकारिक-जालपुटे अहं दृष्टवान्।

**दीपेशः** – अहो! अस्य नाम्नः इतिहासः अद्भुतः अस्ति। किन्तु खलु भारतस्य इतिहासे अस्य द्वीपस्य काचित् विशिष्टा भूमिका अस्ति?

**अध्यापिका** – आम्, महती भूमिका अस्ति अस्य द्वीपस्य।



© NCERT not to be republished



**दीपा** – कीदृशी भूमिका महोदये! कृपया सूचयतु।

**अध्यापिका** – अस्मिन् द्वीपे 'सेल्युलर्' इति कारागारम् अस्ति। अस्य कारागारस्य अपरं नाम 'कालापानी' इत्यपि अस्ति।

**सुधीरः** – *(साश्चर्यम्)* आचार्ये! अस्य कः अभिप्रायः?

**सुरेखा** – 'कालापानी' इति शब्दं श्रुत्वा एव भीतिः भवति।



**अध्यापिका** – सत्यमेव। भारतस्य स्वातन्त्र्यार्थं युद्धरतानां क्रान्तिकारिणां दमनार्थं ब्रिटिशजनैः निर्मितं त्रितलात्मकम् एतत् कारागारम्। अत्रैव महान् देशभक्तः स्वातन्त्र्यवीरः सावरकरः मातृभूमेः रक्षणाय दश वर्षाणि यावत् कल्पनातीतं घोरं कष्टं सोढवान्।

**मुकुन्दः** – अहो! धन्याः ते स्वातन्त्र्यवीराः। तेषां बलिदानेन एव वयं सुखेन जीवामः।

**सूर्यांशः** – आचार्ये! एतत् स्थानं 'यूनेस्को'-संस्थायाः वैश्विकसम्पदः सूच्याम् अपि संरक्षितम्।

**ऋचा** – महोदये! किम् अस्मिन् द्वीपे जनाः अपि निवसन्ति?

**अध्यापिका** – आम्, तत्र काश्चन अण्डमानी, ओङ्गी, जारवा, सेण्टिनली इत्यादयः विशिष्टाः जनजातयः निवसन्ति। अण्डमानी-ओङ्गी-जारवा-जनजातीनाम् आजीविकायै सर्वकारः

© NCERT not to be republished



नारिकेलस्य उद्यानानां निर्माणम् अकरोत्। सेण्टिनली-जनजातीयाः समाजात् दूरे तिष्ठन्ति। तेषां जनसंख्या अपि स्वल्पा एव।

**सुरुचिः** – महोदये! अत्र भ्रमणाय विशिष्टानि स्थानानि कानि?

**अध्यापिका** – भवत्सु कोऽपि अस्मिन् विषये कथयितुम् इच्छति?

**राजर्षिः** – आम् महोदये! अहं वक्तुम् इच्छामि। अहम् एकदा पित्रा सह भ्रमणाय तत्र अगच्छम्। वयं तत्र सर्वत्र प्रकृतेः हारित्यं नीलसमुद्रं च दृष्टवन्तः। वयं महात्मगान्धि-मरीन-राष्ट्रियम् उद्यानम्, नॉर्थ-बे-द्वीपम्, समुद्रिका-नौसेना-समुद्रीय-सङ्ग्रहालयं, कालापत्थर-तटम्, विजयनगर-तटं च दृष्टवन्तः। तत्र भारतस्य समुद्रतटेषु राधानगर-तटस्य अत्यन्तं विशिष्टं स्थानम् अस्ति। तत्रत्यः श्वेतरेणुः, नीलं निर्मलं जलं,पारदर्शि समुद्रतलं च अविस्मरणीयम् अस्ति।





© NCERT not to be republished

**अध्यापिका** – उत्तमम्, राजर्षे! किं भवान् स्वराजद्वीपं दृष्टवान्?

**राजर्षिः** – न स्मरामि महोदये!

**अध्यापिका** – स्वराजद्वीपे एलीफेण्टा-तटे, नॉर्थ-बे-अन्तरीपे च सिन्धुतलविहारं स्कूबाडाइविङ्ग्, स्नॉर्कलिङ्ग् इत्यादयः विविधाः गतिविधयः चलन्ति। समुद्रस्य अन्तर्भागः विविधवर्णैः मत्स्यैः कच्छपैः अन्यैः जलचरैः प्रवालशृङ्खलाभिः च अलङ्कृतः इव दृश्यते।



**छात्राः** – महोदये! अण्डमान-जनाः आजीविकार्थं किं कुर्वन्ति?

**अध्यापिका** – तत्र मुक्तामालाः, शुक्तिशिल्पानि, नारिकेल-शिल्पानि, उपस्कराः च इत्यादीनाम् उत्पादनेन वाणिज्येन च तेषाम् आजीविका चलति। केचन कृषिकार्येण मत्स्यव्यापारेण च जीविकां निर्वहन्ति।



**छात्राः** – आचार्ये! अस्य वर्णनं श्रुत्वा चित्राणि च दृष्ट्वा अस्माकं मनसि तत्र भ्रमणाय उत्सुकता जागरिता।

**अध्यापिका** – अस्तु, वयम् अवश्यमेव तत्र शैक्षिकभ्रमणार्थं गमिष्यामः।

**अधुना वयं मिलित्वा गायामः** –

**हुतात्मनां पूततपःस्थलीयं**
**विनायकादिस्तुतिभाजनानाम्।**
**स्वराष्ट्रधर्मं ननु शिक्षयन्ती**
**सुदर्शनीया भुवि तीर्थकल्पा॥**

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| द्वीपः | अन्तरीपः | टापू | Island | |
| आकर्षकम् | रमणीयम् | मनोहर | Attractive | |
| जालपुटे | अन्तर्जाले | वेबसाइट पर | On the website | |
| अन्वेषणम् | सन्धानम् | खोज | Search | |
| स्वातन्त्र्यार्थम् | स्वाधीनतार्थम् | स्वतन्त्रता के लिये | For freedom | |
| युद्धरतानाम् | संघर्षरतानाम् | लड़ाई में लगे हुए लोगों के | Of the people engrossed in battle | |
| कल्पनातीतम् | विचारातीतम् | चिन्तन से परे | Beyond imagination | |
| घोरम् | भीषणम् | भयानक | Terrific | |
| वैश्विकसम्पदः | विश्वन्यासस्य | विश्व-धरोहर का | Of world heritage | |
| सोढवान् | सहनं कृतवान् | सहन किया | Bore | |
| सूच्याम् | तालिकायाम् | सूची में | In the List | |
| कारागारम् | बन्धनगृहम् | कारागृह | Prison | |
| त्रितलात्मकम् | त्रिस्तरीयम् | तीन तल का | Three-storied | |
| दशवर्षं यावत् | पर्यन्तम् | तक | Until | |
| जनजातिः | गणजातिः | वनवासी | Tribal | |
| श्वेतरेणुः | धवलधूलिः | श्वेत बालू | White sand | |
| पारदर्शी | तलदर्शी | आर-पार दिखने वाला | Transparent | |
| हारित्यम् | हारितस्य भावः | हरियाली को | Greenery | |
| मुक्तामालाः | मौक्तिकमालाः | मोतियों की मालाओं को | Pearl necklaces | |
| नारिकेलम् | श्रीफलम् | नारियल | Coconut | |
| उपस्कराः | वेसवाराः | मसाले | Seasoning | |
| शिल्पानि | चित्रकलादि-कर्माणि | शिल्पकला | Sculpture | |
| कच्छपः | कूर्मः | कछुआ | Tortoise | |
| प्रवालप्रस्तरैः | विद्रुम-शिलाभिः | मूँगे की चट्टानों से | By the coral reefs | |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. पाठं पठित्वा अधोलिखितानि पदानि परस्परं मेलयन्तु —**

| क | ख |
|---|---|
| हान्दुमान् | एलीफेण्टा |
| कालापानी | श्वेतरेणुः |
| जारवा | सावरकरः |
| स्वराजद्वीपः | सेल्यूलरकारागारः |
| राधानगरतटः | जनजातिः |
| स्वातन्त्र्यवीरः | अण्डमानः |

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) रामायणकाले अण्डमानद्वीपस्य नाम किम् आसीत्?

(ख) स्वातन्त्र्यवीरः सावरकरः कति वर्षाणि कष्टं सोढवान्?

(ग) अण्डमानद्वीपे काः जनजातयः निवसन्ति?

(घ) अण्डमानद्वीपे आजीविकार्थं जनाः किं कुर्वन्ति?

(ङ) अन्ते सर्वे मिलित्वा कं श्लोकं गायन्ति?



**३. पाठं दृष्ट्वा रिक्तस्थानानि पूरयन्तु —**

(क) अण्डमानद्वीपस्य राजधानी .................................... अस्ति।

(ख) सूर्यांशः गृहं गत्वा .................................... अण्डमानस्य अन्वेषणम् अकरोत्।

(ग) प्रथमशताब्द्याम् अस्य नाम .................................... इति आसीत्।

(घ) अस्मिन् द्वीपे .................................... इति कारागारम् अस्ति।

(ङ) वयं स्वातन्त्र्यवीराणां .................................... सुखेन जीवामः।

(च) कालापानी .................................... संस्थायाः वैश्विकसम्पदः सूच्यां संरक्षितम्।

(छ) कृषिकार्येण .................................... च जीविकां निर्वहन्ति।

© NCERT not to be republished

४. **अधोलिखितानां विशेषण-विशेष्यपदानां मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु—**

| | | | | |
|---|---|---|---|---|
| (क) | नीलम् | समुद्रतटेषु | नीलं | समुद्रम् |
| (ख) | सुन्दरतमेषु | आपणे | ............ | ............ |
| (ग) | स्वीयाः | समुद्रम् | ............ | ............ |
| (घ) | विविधवर्णाः | रीतिपरम्पराः | ............ | ............ |
| (ङ) | स्थानीये | स्थानम् | ............ | ............ |
| (च) | प्रथमम् | मत्स्याः | ............ | ............ |

५. **पट्टिकातः समुचितानि पदानि चित्वा विशेषणानुसारं विशेष्यपदं लिखन्तु—**

वृक्षान्, गुरुकुलम्, गृहे, तटस्य, पाठशालां, पुस्तकानि, शाटिकायां, गजाय, युवती, मार्गः

| | | | | | |
|---|---|---|---|---|---|
| (क) | नूतने | ............ | (ख) | पवित्रं | ............ |
| (ग) | रक्तायां | ............ | (घ) | उत्तमानि | ............ |
| (ङ) | सुदीर्घः | ............ | (च) | सुन्दरी | ............ |
| (छ) | उन्नतान् | ............ | (ज) | विशालां | ............ |
| (झ) | स्थूलाय | ............ | (ञ) | तस्य | ............ |

६. **पट्टिकातः सर्वनामविशेषणपदानि चित्वा वाक्यानि पूरयन्तु—**

ते, तस्मिन्, तत्, तेषां, एषा, तौ, तस्यै, ताः, तेन, सः

(क) ............ पुष्पाणाम् उद्यानम् अस्ति।

(ख) ............ वृद्धा आपणं गच्छति।

(ग) ............ चित्रे चन्द्रयानम् अस्ति।

(घ) ............ शिक्षकः संस्कृतं पाठयति।

(ङ) ............ बालकाः जलं पिबन्ति।



© NCERT not to be republished

(च) .............................. पुष्पम् आकर्षकम् अस्ति।

(छ) .............................. कन्दुकेन क्रीडन्ति।

(ज) .............................. शिक्षिकाः गीतं शिक्षयन्ति।

(झ) .............................. मयूरौ नृत्यतः।

(ञ) .............................. बालिकायै पुस्तकानि यच्छ।



७. पाठे प्रयुक्तानि अव्ययपदानि क्रियापदानि च चित्वा समुचिते स्थाने लिखन्तु —

| अव्ययानि | क्रियापदानि |
|---|---|
| यथा – कुत्र | यथा – स्मरामि |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |

© NCERT not to be republished

८. निम्नलिखितानां पदानां स्वरूपं सावधानं दृष्ट्वा उदाहरणानुसारं लिखन्तु —

यथा – समुद्रस्य मध्ये .............. समुद्रमध्ये ..............

(क) द्वीपानां समूहः ..............................

(ख) रामायणस्य काले ..............................

(ग) भारतस्य भूमिः ..............................

(घ) उद्योगस्य विषयः ..............................

(ङ) देशस्य भक्तः ..............................

(च) समुद्रस्य तलम् ..............................





## योग्यताविस्तरः

- श्रीविजयपुरम् – भारतीयसर्वकारेण पोर्ट-ब्लेयर इत्यस्य नाम परिवर्त्य श्रीविजयपुरम् इति कृतम्।
- स्कूबा-डैविङ्ग् – पृष्ठे प्राणवायोः कोषं स्थापयित्वा, कोषे संलग्ननलिकया मुखनासिकाभ्यां श्वासग्रहणेन सह गभीरजले सन्तरणम्।
- स्नॉर्कलिङ्ग्– उपनेत्रं धृत्वा समुद्रजलस्य उपरि प्लवनम्।
- सिन्धु-तल-विहारः– सीवॉक् नाम्ना प्रसिद्धः। अस्मिन् गतिविधौ जनाः समुद्रस्य तलं यावत् गच्छन्ति।
- कोरल्-रीफ् – प्रवालशैलसमूहः कोरल्-रीफ्-नाम्ना ज्ञायते।

| द्वीपानां पुरातनं नाम | नूतनं नाम |
|---|---|
| रॉस्-द्वीपः | नेताजीसुभाषचन्द्रबोसद्वीपः |
| नील-द्वीपः | शहीदद्वीपः |
| हैवलॉक्-द्वीपः | स्वराजद्वीपः |

© NCERT not to be republished



## अण्डमान-प्रशस्तिः

विभात्यवाच्याम्बुधिगर्भशोभी
पुत्रः कनिष्ठः ननु भारतस्य।
सुनीलवारिश्रितस्निग्धगात्रः
द्वीपेषु रम्यः द्वीपोऽण्डमानः॥

राष्ट्रस्य गौरवस्थानमितिहासे महत्स्थलम्।
असकृद्दर्शने योग्यमण्डमानो विराजते॥
चण्डहिंसा स्वदेशार्थं द्रोहिणां खण्डनात्पुरा।
दण्डनैर्यत्र भुक्ताभूदण्डमानो विराजते॥

हरितविपिनरम्यैः संवृतो द्वीपवृन्दैः
लसति परमवाच्यां नीलसिन्धोस्तटस्थः।
प्रथितभुवि निकोबार्-सेल्युलर्-लोकलोके
प्रकृतिकृतिपरोऽयं राजते मेऽण्डमानः॥



### परियोजनाकार्यम्

१. 'अण्डमान' इति क्षेत्रस्य विभिन्नानां स्थानानां तटानां च चित्राणि सङ्गृह्य शीर्षकसहितं सङ्ग्रह-पुस्तिकायां स्थापयन्तु।
२. भवान्/भवती पितृभ्यां / शिक्षकैः सह भ्रमणाय पर्वतप्रदेशे तटीयप्रदेशे च अगच्छत् तस्य एकेन परिच्छेदेन वर्णनं लिखन्तु।

© NCERT not to be republished

# द्वादशः पाठः

# वीराङ्गना पन्नाधाया

0772CH12

एषा भारतभूमिः वीराणां त्यागधनानां भूमिः अस्ति। सर्वे भारतीयाः 'एषा भूमिः अस्माकं माता' इति वदन्ति। अथर्ववेदे 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति उक्तम्। मातृभूमेः रक्षणार्थं भारतीयाः सर्वस्वम् अर्पितवन्तः। एतादृशानां भारतीयानां गणनायां महिलानां प्रभूतं योगदानम् अस्ति। त्यागे वीरतायां च महिलाः शत्रुनिबर्हणाः आसन्। एतादृशीषु वीराङ्गनासु राजस्थानस्य पन्नाधाया काचिद् विशिष्टा वीराङ्गना आसीत्। एषा साहसस्य त्यागस्य निष्ठायाः च अद्वितीया मूर्तिः आसीत्। अस्मिन् पाठे तस्याः त्यागस्य पराक्रमस्य च वर्णनं कृतम्। एषा इतिहासस्य स्वर्णिमाक्षरैः लिखिता घटना अस्ति।



© NCERT not to be republished

षोडशे शतके मेवाडनगरे महाराणा-सङ्ग्रामसिंहः इति सुविख्यातः महाराजः आसीत्। तस्य द्वौ पुत्रौ विक्रमादित्यः उदयसिंहः च आस्ताम्। महाराणासङ्ग्रामसिंहस्य भ्राता पृथ्वीराजः। बनवीरः पृथ्वीराजस्य अष्टादशसु पुत्रेषु अन्यतमः।

सः बनवीरः महाराणासङ्ग्रामसिंहस्य प्रथमं पुत्रं विक्रमादित्यं छलेन मारयित्वा मेवाडस्य शासनम् अकरोत्। ततः परमपि सः दुष्टबुद्धिः अचिन्तयत् यत् – "अहम् एकः एव उत्तराधिकारी भवेयम्। न कोऽपि मम प्रतिस्पर्धी स्यात्" इति।



अतः कदाचित् रात्रौ सः उदयसिंहं मारयितुं कुतन्त्रम् अरचयत्। तद् ज्ञात्वा पन्नाधाया उदयसिंहस्य शयनस्थाने स्वपुत्रं चन्दनं शायितवती। सा तस्य दुष्परिणामं जानाति स्म। बनवीरः उदयसिंहस्य शयनागारम् आगच्छत्। तत्र सुप्तः चन्दनः एव उदयसिंहः इति मत्वा बनवीरः चन्दनम् अमारयत्।



पन्नाधायायाः निर्णयः अकल्पनीयः आसीत्। 'व्यक्तिहितं न, राष्ट्रहितम् एव श्रेष्ठम्' इति सा जानाति स्म। तस्याः पुत्रस्तु दिवङ्गतः, परं सा मेवाडराज्यं बनवीरस्य कुतन्त्रात् अरक्षत्।

कालान्तरे सः एव उदयसिंहः युद्धे बनवीरं हत्वा मेवाडराज्यस्य राजा अभवत्। तस्य पुत्रः एव पराक्रमी योद्धा महाराणाप्रतापः। सः प्रतापः शौर्येण भारतीयानां हृदये चिरं स्थानं प्राप्नोत्। कथ्यते एव – "यदि पन्नाधाया स्वपुत्रस्य बलिदानं न अकरिष्यत् तर्हि उदयसिंहः न अभविष्यत्। यदि उदयसिंहः न अभविष्यत् तर्हि महाराणाप्रतापः अपि न अभविष्यत्"।

पन्नाधायायाः त्यागः शौर्यं च जगति आचन्द्रार्कं तिष्ठति। भारतीये इतिहासे वीराङ्गनानां गणनासु पन्नाधाया महत्तमं स्थानं प्राप्नोत्। पन्नाधायायाः बलिदानं सर्वान् शौर्यं, राष्ट्रभक्तिं, कर्तव्यनिष्ठां, बलिदानं, विवेकं च शिक्षयति। उच्यते एव –

**"यदि पन्नाधाया नाभविष्यत् तर्हि कुतो राणाप्रतापः"**



not to be republished © NCERT

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| त्यागधनानाम् | त्यागमूर्तीनाम् | बलिदानियों की | Of people who sacrifice everything | |
| सर्वस्वम् | स्वीयं सम्पूर्णम् | अपना सब कुछ | One's Everything | |
| प्रभूतम् | प्रचुरम् | अधिक | Abundant | |
| शत्रुनिबर्हणाः | अरिविनाशकाः | शत्रुओं का विनाशक | Destroyers of enemies | |
| वीराङ्गनासु | वीरनारीषु | वीर नारियों में | Among brave women | |
| साहसस्य | वीरतायाः | साहस का | Of courage | |
| स्वर्णिमाक्षरैः | सुवर्णाक्षरैः | सोने के अक्षरों से | With golden letters | |
| षोडशे शतके | षोडश-शताब्द्याम् | सोलहवीं शताब्दी में | In the sixteenth century | |
| छलेन | वञ्चनेन | कपट से | By deception | |
| कुतन्त्रम् | कुचक्रम् | षड्यन्त्र | Evil plot | |
| अद्वितीयम् | अनुपमम् | सर्वोत्कृष्ट | Matchless | |
| धाया | धात्री | धाय / दाई | Wet Nurse | |
| आस्ताम् | अभवताम् | दो थे | Two were present | |
| अन्यतमः | बहुषु एकः | बहुतों में एक | One of many | |
| दुष्टबुद्धिः | दुर्बुद्धिः | दुष्ट बुद्धि वाला | Evil minded | |
| प्रतिस्पर्धी | स्पर्धालुः | प्रतिद्वन्द्वी | Competitor | |
| मारयितुम् | हन्तुम् | मारने के लिए | To kill | |
| कदाचित् | कस्मिंश्चित् समये | कभी | Sometime | |
| शायितवती | शयनं कारितवती | सुलाया | Put to sleep | |
| दुष्परिणामम् | कुपरिणामम् | अनिष्ट को | Bad outcome | |
| शयनागारम् | शयनप्रकोष्ठम् | सोने के कक्ष को | Bedroom | |
| कल्पनातीतः | अकल्पनीयः | चिन्तन से परे | Beyond imagination | |
| व्यक्तिहितम् | निजहितम् | स्वार्थ | Self interest | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| राष्ट्रहितम् | देशकल्याणम् | राष्ट्र का हित | National's interest | |
| श्रेष्ठम् | शीर्ष-स्थानीयम् | सर्वोपरि | Highest | |
| कालान्तरे | परवर्ति-समये | कुछ समय के बाद | Later on | |
| हत्वा | मारयित्वा | मारकर | Having killed | |
| पराक्रमी | विक्रमी | वीर | Valorous | |
| योद्धा | युद्धे समर्थः | सैनिक | Warrior | |
| स्वसामर्थ्येन | स्वस्य बलेन | स्वयं की शक्ति से | By one's own capability | |
| शौर्येण | शूरतायाः कारणेन | शूरता से | With bravery | |
| चिरम् | बहुकालम् | बहुत काल तक | For long time | |
| जगति | विश्वे | संसार में | In the world | |
| आचन्द्रार्कम् | सूर्यस्य चन्द्रस्य च अस्तित्व-पर्यन्तम् | जब तक सूर्य और चन्द्र हैं | As long as the sun and the moon are there | |
| गणनासु | शृङ्खलासु | गिनतियों में | Amongst the consideration of | |
| महत्तमम् | बहुषु श्रेष्ठम् | बहुतों में श्रेष्ठ | Best among the greats | |

© NCERT not to be republished

**उच्चैः पठन्तु, अवगच्छन्तु च।**

लङ्-लकारः (भूतकाले एतस्य लकारस्य प्रयोगः भवति)

**पठ् धातुः (परस्मैपदम्)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

वयं वाक्येषु लङ्लकारस्य प्रयोगं पठामः।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बालकः पाठम् अपठत् | बालकौ पाठम् अपठताम् | बालकाः पाठम् अपठन् |
| मध्यमपुरुषः | त्वं पाठम् अपठः | युवां पाठम् अपठतम् | यूयं पाठम् अपठत |
| उत्तमपुरुषः | अहं पाठम् अपठम् | आवां पाठम् अपठाव | वयं पाठम् अपठाम |



## वयम् अभ्यासं कुर्मः

१. अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तरं लिखन्तु—

(क) राजस्थानस्य वीराङ्गनासु का सुविख्याता? ..........................................

(ख) उदयसिंहः कस्य पुत्रः? ..........................................

(ग) बनवीरः कं मारयितुम् कुतन्त्रम् अरचयत्? ..........................................

(घ) कालान्तरे कः मेवाडस्य राजा अभवत्? ..........................................

(ङ) पन्नाधायायाः निर्णयः कीदृशः आसीत्? ..........................................

(च) महाराणाप्रतापः केषां हृदये चिरं स्थानं प्राप्नोत्? ..........................................

२. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—

(क) पन्नाधाया कस्य अद्वितीयम् उदाहरणम् अस्ति?

(ख) महाराणासङ्ग्रामसिंहस्य पुत्रौ कौ आस्ताम्?

(ग) दुष्टबुद्धिः बनवीरः किम् अचिन्तयत्?

(घ) बनवीरस्य कुतन्त्रं ज्ञात्वा पन्नाधाया किम् अकरोत्?

(ङ) आचन्द्रार्कं किं तिष्ठति?

(च) पन्नाधायायाः बलिदानं किं शिक्षयति?



© NCERT not to be republished

३. **उदाहरणानुसारम् उचितैः पदैः रिक्तस्थानानि पूरयन्तु—**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | अमिलत् | अमिलताम् | अमिलन् |
| (ख) | .............................. | अवदतम् | .............................. |
| (ग) | अखादः | .............................. | .............................. |
| (घ) | .............................. | .............................. | अलिखन् |
| (ङ) | .............................. | अरक्षाव | .............................. |
| (च) | .............................. | .............................. | अपिबत |
| (छ) | अपृच्छम् | .............................. | .............................. |
| (ज) | .............................. | अमारयताम् | .............................. |
| (झ) | .............................. | .............................. | अभवाम |

४. **वाक्यानि पठित्वा उदाहरणानुसारं वचनपरिवर्तनं कुर्वन्तु—**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | सः शालाम् अगच्छत्। | तौ शालाम् अगच्छताम्। | .............................. |
| (ख) | बालिका पद्यम् अलिखत्। | .............................. | .............................. |
| (ग) | शिक्षकः अवदत्। | .............................. | .............................. |
| (घ) | सा चित्रम् अपश्यत्। | .............................. | .............................. |
| (ङ) | त्वम् अक्रीडः। | .............................. | .............................. |
| (च) | त्वं जलम् अनयः। | .............................. | .............................. |
| (छ) | अहं मन्दिरम् अगच्छम्। | .............................. | .............................. |
| (ज) | अहं मधुरम् अखादम्। | .............................. | .............................. |

५. **उदाहरणानुसारं रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु—**

यथा – महाराणासङ्ग्रामसिंहस्य भ्राता पृथ्वीराजः। – कस्य भ्राता पृथ्वीराजः?

(क) सः अचिन्तयत्। – ..............................

(ख) शयनस्थाने चन्दनं शायितवती। – ..............................

© NCERT not to be republished

(ग) राष्ट्रहितं श्रेष्ठम्। – ..........................................

(घ) बनवीरः चन्दनम् अमारयत्। – ..........................................

(ङ) तस्याः निर्णयः अकल्पनीयः आसीत्। – ..........................................

(च) उदयसिंहः मेवाडस्य राजा अभवत्। – ..........................................

(छ) मम प्रतिस्पर्धी न स्यात्। – ..........................................

**६. उदाहरणानुसारम् अधः प्रदत्तानां पदानां सन्धिं कुर्वन्तु —**

यथा – विद्या + अभ्यासः = .........विद्याभ्यासः.........

(क) मम + अपि = ..........................................

(ख) विद्या + अर्थी = ..........................................

(ग) सह + अनुभूतिः = ..........................................

(घ) कवि + इन्द्रः = ..........................................

(ङ) गिरि + ईशः = ..........................................

(च) वेद + अलङ्कारः = ..........................................

(छ) दैत्य + अरिः = ..........................................

(ज) सु + उक्तिः = ..........................................

**७. उदाहरणानुसारम् अधः प्रदत्तानि वाक्यानि वर्तमानकाले (लट्लकारे) परिवर्तयन्तु —**

यथा – पन्नाधाया राज्यम् अरक्षत्। – .........पन्नाधाया राज्यं रक्षति।.........

(क) उदयसिंहः वीरः आसीत्। – ..........................................

(ख) अहं तत् सर्वम् अपश्यम्। – ..........................................

(ग) बनवीरः कुतन्त्रम् अकरोत्। – ..........................................

(घ) त्वं शयनस्थानम् अगच्छः। – ..........................................

(ङ) ते कथाम् अपठन्। – ..........................................

© NCERT not to be republished

(च) धात्री उदयसिंहम् अपृच्छत्। – ..........................................................

(छ) वयं शूराः अभवाम। – ..........................................................



## योग्यताविस्तरः

**१. सामान्यतः भूतकाले लङ्-लकारस्य स्थाने क्तवतुप्रत्ययान्त-पदस्य प्रयोगः क्रियते।**

| धातुः | लट्-लकारः (वर्तमानकालः) | लङ्-लकारः (भूतकालः) | क्तवतु-प्रत्ययान्त-पदम् पुंलिङ्गं स्त्रीलिङ्गं च |
|---|---|---|---|
| **पठ्** | पठति | अपठत् | पठितवान्/पठितवती |
| **लिख्** | लिखति | अलिखत् | लिखितवान्/लिखितवती |
| **खाद्** | खादति | अखादत् | खादितवान्/खादितवती |
| **पिब्** | पिबति | अपिबत् | पीतवान्/पीतवती |
| **रक्ष्** | रक्षति | अरक्षत् | रक्षितवान्/रक्षितवती |
| **कृ** | करोति | अकरोत् | कृतवान्/कृतवती |
| **भू** | भवति | अभवत् | भूतवान्/भूतवती |
| **मिल्** | मिलति | अमिलत् | मिलितवान्/मिलितवती |
| **चल्** | चलति | अचलत् | चलितवान्/चलितवती |
| **गम्** | गच्छति | अगच्छत् | गतवान्/गतवती |
| **नय्** | नयति | अनयत् | नीतवान्/नीतवती |
| **स्मर्** | स्मरति | अस्मरत् | स्मृतवान्/स्मृतवती |
| **त्यज्** | त्यजति | अत्यजत् | त्यक्तवान्/त्यक्तवती |
| **पृच्छ्** | पृच्छति | अपृच्छत् | पृष्टवान्/पृष्टवती |
| **तिष्ठ्** | तिष्ठति | अतिष्ठत् | स्थितवान्/स्थितवती |
| **दृश्** | पश्यति | अपश्यत् | दृष्टवान्/दृष्टवती |
| **क्रीड्** | क्रीडति | अक्रीडत् | क्रीडितवान्/क्रीडितवती |

© NCERT not to be republished

## २. राज्यस्य सप्त अङ्गानि भवन्ति —

१. स्वामी  २. अमात्यः  ३. सुहृत्  ४. कोषः

५. राष्ट्रम्  ६. दुर्गम्  ७. बलम्

एतानि सुदृढानि चेत् राष्ट्रं सुदृढं भवति।

## ३. प्राचीनकाले युद्धेषु विविधव्यूहानां रचना क्रियते स्म —

यथा – चक्रव्यूहः, गरुडव्यूहः, सर्पव्यूहः, मकरव्यूहः, अर्धचन्द्रव्यूहः, मण्डलव्यूहः, ओरमीव्यूहः, क्रौञ्चव्यूहः, वज्रव्यूहः च इत्यादयः व्यूहाः।










## परियोजनाकार्यम्

**भारतीयानां वीराङ्गनानां चित्राणि संगृह्य तासां पराक्रमं सारांशरूपेण स्वभाषया लिखन्तु।**

यथा – लक्ष्मीबाई, पद्मावती, कित्तूरराणी, चन्नम्मा, रुद्रम्मादेवी, झलकारी, रानीहाडी चेत्यादीनाम्।

© NCERT not to be republished

# अतिरिक्तम् अध्ययनम्

# वर्णमात्रा-परिचयः

0772CH13

**श्रद्धा** – नमस्ते अध्यापक-महोदय ! षष्ठ-कक्षायाः पाठ्यपुस्तके **वर्णमालायाः** पाठे कश्चित् संदेहः अस्ति। **वर्णमालायाः** पाठस्य प्रारम्भे वयं पूर्वं **स्वराणां** द्वे मात्रे दृष्टवन्तः –

☛ (१) '**ह्रस्वः**' – **एकमात्रः** (२) '**दीर्घः**' – **द्विमात्रः** च।

परन्तु अग्रे पाठस्य अन्ते **स्वराणां** तृतीया मात्रा अपि काचित् प्रदर्शिता –

☛ (३) '**प्लुतः**' – **त्रिमात्रः** इति।

कः एषः स्वराणां 'प्लुतः' नाम त्रिमात्रः ?

**अध्यापकः** – श्रद्धे ! समीचीनं प्रश्नं पृष्टवती। सामान्यतः अन्य-भारतीय-भाषासु स्वराणां प्रायः द्वे मात्रे एव भवतः – 'ह्रस्वः', 'दीर्घः' च। अत एव पाठे पूर्वं सरलतार्थं द्वे मात्रे एव प्रदर्शिते।

परन्तु संस्कृत-भाषायां वस्तुतः सर्वेषां स्वराणां त्रिमात्रः अपि कश्चिद् उपभेदः भवति। यथा –

| | ह्रस्वः (एकमात्रः – १) | दीर्घः (द्विमात्रः – २) | प्लुतः (त्रिमात्रः – ३) |
|---|---|---|---|
| **१. समानाक्षराणि** | अ | आ | अ३ |
| | इ | ई | इ३ |
| | उ | ऊ | उ३ |
| | ऋ | ॠ | ऋ३ |
| | ऌ | – | ऌ३ |
| **२. सन्ध्यक्षराणि** | – | ए | ए३ |
| | – | ऐ | ऐ३ |
| | – | ओ | ओ३ |
| | – | औ | औ३ |

© NCERT not to be republished

एवंप्रकारेण संस्कृत-भाषायाम् आहत्य **२२ स्वराः** भवन्ति।

संस्कृत-भाषायां प्लुत-स्वराणां प्रयोगः प्रायः द्वयोः सन्दर्भयोः अधिकं भवति –

(क) यदा दूरात् कम् अपि आह्वयामः, यथा –

- **हे३ राम !**
- **अत्र आगच्छ कुमार३ !**

(ख) वेद-मन्त्रस्य प्रारम्भे यदा पवित्रस्य ओंकारस्य उच्चारणं कुर्मः, यथा –

- **ओ३म् – भूर्भुवः स्वः। तत्सवितुर्वरेण्यम् ....** *(गायत्री-महामन्त्रः)*
- **ओ३म् – सङ्गच्छध्वं संवदध्वं, सं वो मनांसि जानताम् ....** *(सङ्गठन-मन्त्रः)*

इदम् अत्र ध्यातव्यं यत् – एताः तिस्रः मात्राः केवलं स्वरेषु भवन्ति, व्यञ्जनेषु न भवन्ति।
सर्वेषां व्यञ्जनानां तु नित्यम् 'अर्ध-मात्रा' एव भवति। अत्र याज्ञवल्क्य-शिक्षायाः प्रसिद्धः श्लोकः अस्ति –

**एकमात्रो भवेद् ह्रस्वः द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रश्च प्लुतो ज्ञेयः व्यञ्जनं चार्धमात्रिकम्॥**

**पदच्छेदः –** एकमात्रः भवेत् ह्रस्वः द्विमात्रः दीर्घः उच्यते त्रिमात्रः च प्लुतः ज्ञेयः व्यञ्जनम् च अर्धमात्रिकम्।

**अर्थः –** एकमात्रः (स्वरः) 'ह्रस्वः' भवति। द्विमात्रः (स्वरः) 'दीर्घः' इति कथ्यते। त्रिमात्रः (स्वरः) 'प्लुतः' इति ज्ञातव्यः। व्यञ्जनं तु अर्धमात्रिकम् एव भवति।

| | | | | |
|---|---|---|---|---|
| • **स्वरः** | एकमात्रः | (१) | – **ह्रस्वः** | त्रिविधाः मात्राः |
| | द्विमात्रः | (२) | – **दीर्घः** | |
| | त्रिमात्रः | (३) | – **प्लुतः** | |
| • **व्यञ्जनम्** | — अर्धमात्रम् | (½) | **अर्धमात्रिकम्** | — एकविधा मात्रा |

© NCERT not to be republished

अतः, **स्वरेषु** यौ **द्वौ भेदौ** वयं पूर्वं दृष्टवन्तः –

☛ (१) **समानाक्षराणि**, (२) **सन्ध्यक्षराणि** च।

→ तयोः अग्रे – एते त्रयः उपभेदाः भवन्ति – **त्रिविधाः मात्राः** इति।

तथा च, **व्यञ्जनेषु** यान् भेदान् वयं पूर्वं दृष्टवन्तः –

☛ (१) **स्पर्शाः**, (२) **अन्तःस्थाः**, (३) **ऊष्माणः**, (४) **अयोगवाहौ** (अनुस्वार-विसर्गौ) च,

→ तेषाम् एषः – एक एव उपभेदः भवति – **एकविधा अर्ध-मात्रा** इति।

एवं संस्कृत-भाषायाः **वर्णानां** – **चतुर्विधाः मात्राः** भवन्ति।

## विविधानां मात्राणां मध्ये परस्परं भेदः

विविधानां मात्राणाम् उच्चारणे परस्परं **कालस्य** भेदः भवति।

पूर्वं स्वराणां त्रिविधाः मात्राः पश्यामः।

अस्य सम्यक् निदर्शनं वयं प्रकृतौ

कुक्कुट-ध्वनौ श्रोतुं शक्नुमः।

अस्तु, वदन्तु छात्राः –

कुक्कुटः प्रातः कथं रौति ?




**सर्वे छात्राः** (उच्चैः सोत्साहम्) –




© NCERT not to be republished

**अध्यापकः** – अलम्! अलम्! बहु शोभनम्। भवन्तः तु सर्वे कुक्कुटाः एव सञ्जाताः। कुक्कुटाः इव रुवन्ति सर्वे। अस्तु! अधुना ध्यानं निदधतु। अत्र त्रिप्रकारकाः ध्वनयः सन्ति।

(१) प्रथम-प्रकारः ध्वनिः 'उ' इति अल्पकालिकः – **एकमात्रः**।

(२) द्वितीय-प्रकारः ध्वनिः 'ऊ' इति लम्बकालिकः – **द्विमात्रः**।

(३) तृतीय-प्रकारः ध्वनिः 'उ३' इति अतिविलम्बकालिकः – **त्रिमात्रः**।

कुक्कुट-ध्वनेः एतान् त्रीन् कालान् क्रमेण – स्वराणाम् एताः त्रिविधाः मात्राः अनुसरन्ति।

☛ (१) **ह्रस्वः**, (२) **दीर्घः**, (३) **प्लुतः** च।

अस्माकं परिसरे प्रकृतौ च बहूनाम् पशु-पक्षिणां ध्वनिषु अपि वर्णानाम् एताः मात्राः द्रष्टुं शक्नुमः। अत्र अपरः पाणिनीय-शिक्षायाः प्रसिद्धः श्लोकः अस्ति –




**पदच्छेदः** – चाषः तु वदते मात्राम् द्विमात्रम् तु एव वायसः शिखी रौति त्रिमात्रम् तु नकुलः तु अर्धमात्रकम्

**भावार्थः** –

- **चाषः** (नीलकण्ठः) पक्षी – एकमात्रकालं ध्वनिं करोति। स **एकमात्रः** ध्वनिः **ह्रस्व-स्वरः** इव भवति।
- **वायसः** (काकः) पक्षी – द्विमात्रकालं ध्वनिं करोति। स **द्विमात्रः** ध्वनिः **दीर्घ-स्वरः** इव भवति।
- **शिखी** (मयूरः) पक्षी – त्रिमात्रकालं ध्वनिं करोति। स **त्रिमात्रः** ध्वनिः **प्लुत-स्वरः** इव भवति।
- **नकुलः** पशुः – अर्धमात्रकालं ध्वनिं करोति। स **अर्धमात्रः** ध्वनिः **व्यञ्जनम्** इव भवति।

## मात्रा-गणना-क्रीडा

वयं प्रत्येकं वर्णस्य मात्रां ज्ञातवन्तः। अस्य आधारेण अधुना कस्यचित् सम्पूर्णस्य शब्दस्य अपि मात्रां गणयितुं शक्नुमः, यथा –

रामः = र् + आ + म् + अ + : = रामः
१/२ + २ + १/२ + १ + १/२ = ४ १/२ मात्राः

सीता = स् + ई + त् + आ = सीता
१/२ + २ + १/२ + २ = ५ मात्राः

हनूमान् = ह् + अ + न् + ऊ + म् + आ + न् = हनूमान्
१/२ + १ + १/२ + २ + १/२ + २ + १/२ = ७ मात्राः

भरतः = भ् + अ + र् + अ + त् + अ + : = भरतः
१/२ + १ + १/२ + १ + १/२ + १ + १/२ = ५ मात्राः

**संयुक्त-व्यञ्जन-युक्ताः शब्दाः –**

कौसल्या = क् + औ + स् + अ + ल् + य् + आ = कौसल्या
१/२ + २ + १/२ + १ + १/२ + १/२ + २ = ७ मात्राः

लक्ष्मणः = ल् + अ + क् + ष् + म् + अ + ण् + अ + : = लक्ष्मणः
१/२ + १ + १/२ + १/२ + १/२ + १ + १/२ + १ + १/२ = ६ मात्राः

© NCERT not to be republished

शत्रुघ्नः = श् + अ + त् + र् + उ + घ् + न् + अ + : = शत्रुघ्नः

१/२ + १ + १/२ + १/२ + १ + १/२ + १/२ + १ + १/२ = ६ मात्राः

**प्लुत-स्वर-युक्ताः शब्दाः –**

हे३ = ह् + ए३ = हे३

१/२ + ३ = ३ १/२ मात्राः

ओ३म् = ओ३ + म् = ओ३म्

३ + १/२ = ३ १/२ मात्राः

कुमार३ = क् + उ + म् + आ + र् + अ३ = कुमार३

१/२ + १ + १/२ + २ + १/२ + ३ = ७ १/२ मात्राः

**अनुनासिक-स्वर-युक्ताः शब्दाः –**

काँस्कान् = क् + आँ + स् + क् + आ + न् = काँस्कान्

१/२ + २ + १/२ + १/२ + २ + १/२ = ६ मात्राः

सँस्कर्ता = स् + अँ + स् + क् + अ + र् + त् + आ = सँस्कर्ता

१/२ + १ + १/२ + १/२ + १ + १/२ + १/२ + २ = ६ १/२ मात्राः

पश्यन्तु छात्राः ! संस्कृत-भाषायां तथा अन्य-भारतीय-भाषासु च गणितस्य कियान् सुष्ठु सरलः च समावेशः भवति। प्रायः सर्वाः भारतीय-भाषाः संस्कृतात् एव स्व-वर्णमालां स्वीकृतवत्यः। इदं तथ्यं संस्कृत-भाषायाः तथा च संस्कृतानुसारिणीनां सर्वासाम् अन्य-भारतीय-भाषाणाम् एकं महत्त्वपूर्णं वैशिष्ट्यम् अस्ति। विश्वस्य अन्यासु कासु अपि भाषासु एतत् वैशिष्ट्यं द्रष्टुं न शक्नुमः।

© NCERT not to be republished

## मात्राणां महत्त्वम्

मात्रा-गणनायाः उपयोगः वर्णानां शब्दानां च सम्यग्-रीत्या उच्चारणे तथा च श्लोक-रचनायां महत्त्वपूर्णः भवति। श्लोक-रचना-समये मात्राणां निर्दिष्ट-गणनायाः आवश्यकता भवति। संस्कृत-भाषायां निर्दिष्ट-मात्राणां छन्दो-बद्धानां श्लोकानां च अतीव विशिष्टं महत्त्वं भवति। अत एव संस्कृत-भाषायाः श्लोकाः स्तोत्राणि च विश्वे सर्वत्र विख्यातानि सन्ति। अग्रिमासु कक्षासु श्लोकरचना-विषये अधिकं ज्ञास्यामः।

# विशेषं चिह्नम्

ॐ → अस्य पवित्र-चिह्नस्य प्रयोगः – '**ओम्**' (**ओ३म्**) इति पवित्र-शब्दस्य स्थाने प्राचीन-कालात् सुप्रसिद्धः अस्ति। अस्य पवित्र-चिह्नस्य (ॐ) पवित्र-शब्दस्य (ओम् / ओ३म्) वा – उभयोः प्रयोगः साधुः अस्ति।

ऽ → अस्य चिह्नस्य नाम 'अवग्रहः' अस्ति। इदं किञ्चित् नवीनं वर्णान्तरं नास्ति। अतः अस्य किमपि उच्चारणं न भवति। प्रायः सन्धि-नियमानुसारं यदा अकारः अदृश्यः भवति, तदा अस्य उपयोगः भवति। यथा – '**कः अपि**' इत्यत्र यदा सन्धिः भवति = [को + अपि = को + पि = कोपि], तदा – '**कोऽपि**' इत्यपि लिख्यते। अत्र '**कोपि**' अथवा '**कोऽपि**' – उभयथा अपि लेखितुं शक्नुमः। उच्चारणे कोऽपि भेदः न भवति। '**कोपि**' इत्येव उभयत्र उच्चारणं भवति। '**अ**' अत्र अदृश्यः जातः इति निदर्शनार्थम् — '**ऽ**' चिह्नं योज्यते।

© NCERT not to be republished

### वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| उच्यते | कथ्यते | कहा जाता है | Called as | |
| ज्ञेयः | ज्ञातव्यः | जानना चाहिए | Should know | |
| भेदः | प्रकारः | विभाग | Types | |
| उपभेदः | उपप्रकारः | उपविभाग | Sub-types | |
| कुक्कुटः | कृकवाकुः | मुर्गा | Cock / Rooster | |

| | | | | |
|---|---|---|---|---|
| रौति | विरौति | बाँग देता है | Crowing/Cock-a-doodle-doo | |
| रुवन्ति | विरुवन्ति | बाँग देते हैं | (Many) Crowing | |
| ध्यानं निदधतु | अवधानं ददतु | ध्यान दीजिए | Pay attention | |
| अल्पकालिकः | लघु-काल-प्रमाणः | स्वल्प समय वाला | Short time duration | |
| लम्बकालिकः | लम्बमान-काल-प्रमाणः | लम्बे समय वाला | Long time duration | |
| अतिविलम्ब-कालिकः | अधिक-लम्बमान-काल-प्रमाणः | अधिक लम्बे समय वाला | Overly prolonged time duration | |
| चाषः | नीलकण्ठः पक्षी | नीलकण्ठ | Indian Roller (bird) | |
| वायसः | काकः पक्षी | कौआ | Crow | |
| शिखी | मयूरः पक्षी | मोर | Peacock | |
| नकुलः | सूचिरदनः | नेवला | Mongoose | |
| दोला | प्रेङ्खा | झूला | Swing | |
| चटका | गृहनीडः | गौरेया | Sparrow | |
| मूषकः | आखुः | चूहा | Mouse | |
| कपोतः | पारावतः | कबूतर | Pigeon | |
| पुँस्कोकिलः | पुमान् पिकः | नर कोयल | Male cuckoo | |
| कृषकः | कृषीवलः | किसान | Farmer | |
| ऐतिह्यम् | पुरातन-वृत्तान्तः | इतिहास | History | |
| विद्यार्थी | शिक्षार्थी | छात्र | Student | |
| खनित्रम् | फालः | फावड़ा | Indian spade | |
| अट्टहासः | विहसितम् | ठहाका | Boisterous laughter | |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

१. **अधोलिखितानां प्रश्नानाम् एकपदेन द्विपदेन वा उत्तरं लिखन्तु —**

(क) वर्णानां कतिविधाः मात्राः भवन्ति? ..................................

(ख) एकविधा मात्रा केषां भवति? ..................................

(ग) स्वरेषु कतिविधाः मात्राः भवन्ति? ..................................

(घ) संस्कृत-भाषायाम् आहत्य कति स्वराः भवन्ति? ..................................

(ङ) विविध-मात्राणाम् उच्चारणे कस्य भेदः भवति? ..................................

(च) नित्यम् अर्धमात्रा केषां भवति? ..................................

(छ) ध्वनयः कति-प्रकारकाः सन्ति? ..................................

(ज) विसर्गस्य कति मात्राः भवन्ति? ..................................

(झ) अनुस्वारस्य कति मात्राः भवन्ति? ..................................

२. **पूर्णवाक्येन लिखन्तु —**

(क) स्वराणां कतिविधाः भेदाः उपभेदाः च सन्ति? नामानि लिखन्तु?

(ख) व्यञ्जनानां कतिविधाः भेदाः उपभेदाः च सन्ति? नामानि लिखन्तु?

(ग) अनुस्वारस्य विसर्गस्य च सामान्यं नाम किम्? तयोः प्रत्येकं कति मात्राः?

३. **परस्परं मेलयत —**

| (क) | (ख) |
|---|---|
| अ३ | ह्रस्वः |
| ऊ | २½ |
| ऋ | प्लुतः |
| एँ | दीर्घः |
| कू | अनुनासिक-स्वरः |

© NCERT not to be republished

४. पट्टिकातः चित्वा उचितं पदं पूरयन्तु —

शिखी, नकुलः, वायसः, चाषः, कोकिलः

(क) ........................................................ त्रिमात्रकालं ध्वनिं करोति।

(ख) ........................................................ द्विमात्रकालं ध्वनिं करोति।

(ग) ........................................................ एकमात्रकालं ध्वनिं करोति।

(घ) ........................................................ अर्धमात्रकालं ध्वनिं करोति।



## परियोजनाकार्यम्

स्वपरिसरे विद्यमानानां पशु-पक्षिणां ध्वनीन् ध्यानेन शृण्वन्तु। तेषां ध्वनीनां मात्राः कति सन्ति इति लिखन्तु।



## कार्यकलापः

### मात्रा-गणनां क्रीडामः

१. अधोलिखितानां शब्दानां मात्रा-गणनां कुर्वन्तु —

| | |
|---|---|
| दोला | द् + ओ + ल् + आ |
| = ५ मात्राः | ½ + २ + ½ + २ |

| | |
|---|---|
| बालः | ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| चटका | ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... |

© NCERT not to be republished

| | |
|---|---|
| **शक्तिः** | ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **घटिका** | ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **दुःखम्** | ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **मूषकः** | ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **कपोतः** | ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **कृषकः** | ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **ऐतिह्यम्** | ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **संशयः** | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **विद्यार्थी** | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| **खनित्रम्** | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

© NCERT not to be republished

| | |
|---|---|
| धाष्ट्र्यम् | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| प्रक्रिया | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| निःशुल्कम् | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| कस्मिँश्चिद् | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| कात्स्न्र्यम् | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| क्रमाङ्कः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| अट्टहासः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| निःस्वार्थः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| पुनःपुनः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

| | |
|---|---|
| पुँस्कोकिलः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |
| = ...... मात्राः | ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... |

© NCERT not to be republished

# परिशिष्टम् १
# शब्दरूपाणि

0772CH14

## अजन्ताः (अच् = स्वराः) स्वरवर्णाः अन्ते येषां ते अजन्ताः।

## पुंलिङ्गशब्दाः

### 'अ'कारान्ताः पुंलिङ्गशब्दाः

'अ'कारान्तः (देव = द् + ए + व + अ) अत्र अन्तिमवर्णः 'अ' अतः 'अ'कारान्तः इति।

'अ'कारान्तः पुंलिङ्गः 'देव'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | देवौ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | देवात् | देवाभ्याम् | देवेभ्यः |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | देवयोः | देवेषु |
| सम्बोधनम् | हे देव ! | हे देवौ ! | हे देवाः ! |

एवम् – बाल, भीम, शिव, कृष्ण, हस्त, पाद इत्यादयः

'अ'कारान्तः पुंलिङ्गः 'राम'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधनम् | हे राम ! | हे रामौ ! | हे रामाः ! |

एवम् – हर, कर, शर, शिक्षकः, वृक्ष, चषक इत्यादयः

### 'इ'कारान्ताः पुंलिङ्गशब्दाः

'इ'कारान्तः (कवि = क + अ + व् + इ) अत्र अन्तिमवर्णः 'इ' अतः 'इ'कारान्तः इति।

'इ'कारान्तः पुंलिङ्गः 'कवि'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पञ्चमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधनम् | हे कवे ! | हे कवी ! | हे कवयः ! |

एवम् – मुनि, रवि, कपि, विधि, अग्नि इत्यादयः

'इ'कारान्तः पुंलिङ्गः 'हरि'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधनम् | हे हरे ! | हे हरी ! | हे हरयः ! |

एवम् – गिरि, अरि, ऋषि इत्यादयः

© NCERT not to be republished

## ‘उ’कारान्ताः पुंलिङ्गशब्दाः

‘उ’कारान्तः (शम्भु = श् + म् + भ् + उ) अत्र अन्तिमवर्णः ‘उ’ अतः ‘उ’कारान्तः इति।

| ‘उ’कारान्तः पुंलिङ्गः ‘शम्भु’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | शम्भुः | शम्भू | शम्भवः |
| द्वितीया | शम्भुम् | शम्भू | शम्भून् |
| तृतीया | शम्भुना | शम्भुभ्याम् | शम्भुभिः |
| चतुर्थी | शम्भवे | शम्भुभ्याम् | शम्भुभ्यः |
| पञ्चमी | शम्भोः | शम्भुभ्याम् | शम्भुभ्यः |
| षष्ठी | शम्भोः | शम्भ्वोः | शम्भूनाम् |
| सप्तमी | शम्भौ | शम्भ्वोः | शम्भुषु |
| सम्बोधनम् | हे शम्भो! | हे शम्भू! | हे शम्भवः! |
| एवम् – मनु, वायु, पशु, ऋतु, शिशु, भानु, विष्णु इत्यादयः | | | |

| ‘उ’कारान्तः पुंलिङ्गः ‘गुरु’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधनम् | हे गुरो! | हे गुरू! | हे गुरवः! |
| एवम् – तरु, रिपु, प्रभु, इक्षु, शत्रु इत्यादयः | | | |

## ‘ऋ’कारान्ताः पुंलिङ्गशब्दाः

‘ऋ’कारान्तः (पितृ = प् + इ + त् + ऋ) अत्र अन्तिमवर्णः ‘ऋ’ अतः ‘ऋ’कारान्तः इति।

| ‘ऋ’कारान्तः पुंलिङ्गः ‘पितृ’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः! | हे पितरौ! | हे पितरः! |
| एवम् – भ्रातृ, जामातृ इत्यादयः | | | |

| ‘ऋ’कारान्तः पुंलिङ्गः ‘नेतृ’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | नेता | नेतारौ | नेतारः |
| द्वितीया | नेतारम् | नेतारौ | नेतॄन् |
| तृतीया | नेत्रा | नेतृभ्याम् | नेतृभिः |
| चतुर्थी | नेत्रे | नेतृभ्याम् | नेतृभ्यः |
| पञ्चमी | नेतुः | नेतृभ्याम् | नेतृभ्यः |
| षष्ठी | नेतुः | नेत्रोः | नेतॄणाम् |
| सप्तमी | नेतरि | नेत्रोः | नेतृषु |
| सम्बोधनम् | हे नेतः! | हे नेतारौ! | हे नेतारः! |
| एवम् – कर्तृ, धातृ, नप्तृ इत्यादयः | | | |

© NCERT not to be republished

## स्त्रीलिङ्गशब्दाः

### 'आ'कारान्ताः स्त्रीलिङ्गशब्दाः

'आ'कारान्तः (माला = म् + आ + ल + आ) अत्र अन्तिमवर्णः 'आ' अतः 'आ'कारान्तः इति।

'आ'कारान्तः स्त्रीलिङ्गः 'माला'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माला | माले | मालाः |
| द्वितीया | मालाम् | माले | मालाः |
| तृतीया | मालया | मालाभ्याम् | मालाभिः |
| चतुर्थी | मालायै | मालाभ्याम् | मालाभ्यः |
| पञ्चमी | मालायाः | मालाभ्याम् | मालाभ्यः |
| षष्ठी | मालायाः | मालयोः | मालानाम् |
| सप्तमी | मालायाम् | मालयोः | मालासु |
| सम्बोधनम् | हे माले ! | हे माले ! | हे मालाः ! |

एवम् – सीता, सुधा, लता, गीता, राधा, विद्या इत्यादयः

'आ'कारान्तः स्त्रीलिङ्गः 'रमा'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधनम् | हे रमे ! | हे रमे ! | हे रमाः ! |

एवम् – क्षमा, कक्षा, रेखा, रक्षा, शिक्षा इत्यादयः

### 'इ'कारान्ताः स्त्रीलिङ्गशब्दाः

'इ'कारान्तः (मति = म् + अ + त् + इ) अत्र अन्तिमवर्णः 'इ' अतः 'इ'कारान्तः इति।

'इ'कारान्तः स्त्रीलिङ्गः 'मति'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै / मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः / मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः / मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम् / मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते ! | हे मती ! | हे मतयः ! |

'इ'कारान्तः स्त्रीलिङ्गः 'कीर्ति'-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कीर्तिः | कीर्ती | कीर्तयः |
| द्वितीया | कीर्तिम् | कीर्ती | कीर्तीः |
| तृतीया | कीर्त्या | कीर्तिभ्याम् | कीर्तिभिः |
| चतुर्थी | कीर्त्यै / कीर्तये | कीर्तिभ्याम् | कीर्तिभ्यः |
| पञ्चमी | कीर्त्याः / कीर्तेः | कीर्तिभ्याम् | कीर्तिभ्यः |
| षष्ठी | कीर्त्याः / कीर्तेः | कीर्त्योः | कीर्तीनाम् |
| सप्तमी | कीर्त्याम् / कीर्तौ | कीर्त्योः | कीर्तिषु |
| सम्बोधनम् | हे कीर्ते ! | हे कीर्ती ! | हे कीर्तयः ! |

एवम् – बुद्धि, रुचि, शुचि, श्रुति, स्मृति, भक्ति, रीति, स्तुति, जाति, भूमि, गति, स्थिति, रति, कृति, प्रीति, नीति, मूर्ति, युवति, प्रकृति, पङ्क्ति, रात्रि, शक्ति इत्यादयः

© NCERT not to be republished

## ‘ई’कारान्ता: स्त्रीलिङ्गशब्दा:

‘ई’कारान्त: (नदी = न्+ अ + द् + ई) अत्र अन्तिमवर्ण: ‘ई’ अत: ‘ई’कारान्त: इति।

| ‘ई’कारान्त: स्त्रीलिङ्ग: ‘नदी’-शब्द: | | | |
|---|---|---|---|
| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | नदी | नद्यौ | नद्य: |
| द्वितीया | नदीम् | नद्यौ | नदी: |
| तृतीया | नद्या | नदीभ्याम् | नदीभि: |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्य: |
| पञ्चमी | नद्या: | नदीभ्याम् | नदीभ्य: |
| षष्ठी | नद्या: | नद्यो: | नदीनाम् |
| सप्तमी | नद्याम् | नद्यो: | नदीषु |
| सम्बोधनम् | हे नदि ! | हे नद्यौ ! | हे नद्य: ! |

एवम् – देवी, नटी, गोपी, पत्नी, सखी, जननी, वाणी, भगिनी, युवती, लेखनी, अङ्गुली इत्यादय:

| ‘ई’कारान्त: स्त्रीलिङ्ग: ‘गौरी’-शब्द: | | | |
|---|---|---|---|
| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गौरी | गौर्यौ | गौर्य: |
| द्वितीया | गौरीम् | गौर्यौ | गौरी: |
| तृतीया | गौर्या | गौरीभ्याम् | गौरीभि: |
| चतुर्थी | गौर्यै | गौरीभ्याम् | गौरीभ्य: |
| पञ्चमी | गौर्या: | गौरीभ्याम् | गौरीभ्य: |
| षष्ठी | गौर्या: | गौर्यो: | गौरीणाम् |
| सप्तमी | गौर्याम् | गौर्यो: | गौरीषु |
| सम्बोधनम् | हे गौरि ! | हे गौर्यौ ! | हे गौर्य: ! |

एवम् – नारी, नगरी, पुत्री, धात्री, कर्त्री, वक्त्री, ज्ञात्री इत्यादय:

## ‘उ’कारान्ता: स्त्रीलिङ्गशब्दा:

‘उ’कारान्त: (धेनु = ध्+ ए + न् + उ) अत्र अन्तिमवर्ण: ‘उ’ अत: ‘उ’कारान्त: इति।

| ‘उ’कारान्त: स्त्रीलिङ्ग: ‘धेनु’-शब्द: | | | |
|---|---|---|---|
| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | धेनु: | धेनू | धेनव: |
| द्वितीया | धेनुम् | धेनू | धेनू: |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभि: |
| चतुर्थी | धेन्वै / धेनवे | धेनुभ्याम् | धेनुभ्य: |
| पञ्चमी | धेन्वा: / धेनो: | धेनुभ्याम् | धेनुभ्य: |
| षष्ठी | धेन्वा: / धेनो: | धेन्वो: | धेनूनाम् |
| सप्तमी | धेनौ / धेन्वाम् | धेन्वो: | धेनुषु |
| सम्बोधनम् | हे धेनो ! | हे धेनू ! | हे धेनव: ! |

एवम् – रज्जु, चञ्चु, रेणु इत्यादय:

‘ऋ’कारान्त: (मातृ = म् + आ + त् + ऋ) अत्र अन्तिमवर्ण: ‘ऋ’ अत: ‘ऋ’कारान्त: इति।

| ‘ऋ’कारान्त: स्त्रीलिङ्ग: ‘मातृ’-शब्द: | | | |
|---|---|---|---|
| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | माता | मातरौ | मातर: |
| द्वितीया | मातरम् | मातरौ | मातॄ: |
| तृतीया | मात्रा | मातृभ्याम् | मातृभि: |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्य: |
| पञ्चमी | मातु: | मातृभ्याम् | मातृभ्य: |
| षष्ठी | मातु: | मात्रो: | मातॄणाम् |
| सप्तमी | मातरि | मात्रो: | मातृषु |
| सम्बोधनम् | हे मात: ! | हे मातरौ ! | हे मातर: ! |

एवम् – स्वसृ, दुहितृ, ननान्दृ, यातृ इत्यादय:

© NCERT not to be republished

## नपुंसकलिङ्गशब्दाः

### ‘अ’कारान्ताः नपुंसकलिङ्गशब्दाः

‘अ’कारान्तः (फल = फ् + अ + ल् + अ) अत्र अन्तिमवर्णः ‘अ’ अतः ‘अ’कारान्तः इति।

| ‘अ’कारान्तः नपुंसकलिङ्गः ‘फल’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधनम् | हे फल ! | हे फले ! | हे फलानि ! |

एवम् – वन, धन, ज्ञान, नयन, पुस्तक, उद्यान, वातायन, सोपान, बीज इत्यादयः

| ‘अ’कारान्तः नपुंसकलिङ्गः ‘मित्र’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | मित्रम् | मित्रे | मित्राणि |
| द्वितीया | मित्रम् | मित्रे | मित्राणि |
| तृतीया | मित्रेण | मित्राभ्याम् | मित्रैः |
| चतुर्थी | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| पञ्चमी | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| षष्ठी | मित्रस्य | मित्रयोः | मित्राणाम् |
| सप्तमी | मित्रे | मित्रयोः | मित्रेषु |
| सम्बोधनम् | हे मित्र ! | हे मित्रे ! | हे मित्राणि ! |

एवम् – चक्र, चित्र, पत्र, मन्दिर, नेत्र, वस्त्र, पुष्प, गृह, नगर, द्वार इत्यादयः

## सर्वनामशब्दाः

## पुंलिङ्गशब्दाः

| ‘द’कारान्तः सर्वनाम ‘तद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

| ‘द’कारान्तः सर्वनाम ‘एतद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

© NCERT not to be republished

| 'म'कारान्तः सर्वनाम 'किम्'-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## स्त्रीलिङ्गशब्दाः

| 'द'कारान्तः सर्वनाम 'तद्'-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

| 'द'कारान्तः सर्वनाम 'एतद्'-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

| 'म'कारान्तः सर्वनाम 'किम्'-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

© NCERT not to be republished

## नपुंसकलिङ्गशब्दाः

| ‘द’कारान्तः सर्वनाम ‘तद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

| ‘द’कारान्तः सर्वनाम ‘एतद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

| ‘म’कारान्तः सर्वनाम ‘किम्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

| ‘द’कारान्तः सर्वनाम ‘अस्मद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् | आवाम् | अस्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम | आवयोः | अस्माकम् |
| सप्तमी | मयि | आवयोः | अस्मासु |

| ‘द’कारान्तः सर्वनाम ‘युष्मद्’-शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् | युवाम् | युष्मान् |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव | युवयोः | युष्माकम् |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

© NCERT not to be republished

# परिशिष्टम् २

# धातुरूपाणि

0772CH15

## लकाराः (क्रियापदानां रूपाणि)

सामान्यतः संस्कृतभाषायाम् २००० धातवः सन्ति। तेभ्यः 'तिङ्' प्रत्ययान् योजयामः चेत् ते एव तिङन्ताः भवन्ति। तिङ्-प्रत्ययाः येषाम् अन्ते सन्ति ते तिङन्ताः। अथवा लकाराः इति वक्तुं शक्नुमः।

धातवः त्रिप्रकारकाः भवन्ति –

**१. परस्मैपदि-धातवः** **२. आत्मनेपदि-धातवः** **३. उभयपदि-धातवः**

## परस्मैपदि-धातूनां लट्-लकारस्य रूपाणि (वर्तमानकालः)

### लट्-लकारः (वर्तमानकालः)

'पठ्'-धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति | प्रथमपुरुषः | बालः पठति | बालौ पठतः | बालाः पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ | मध्यमपुरुषः | त्वं पठसि | युवां पठथः | यूयं पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः | उत्तमपुरुषः | अहं पठामि | आवां पठावः | वयं पठामः |

एवम् – लिख्, खाद्, वद्, मिल्, हस्, चल्, त्यज्, स्मृ (स्मर्), पा (पिब्), क्रीड्, नी (नय्), प्रछ् (पृच्छ्), भू (भव्), दृश् (पश्य्) गम् (गच्छ्) इत्यादयः

### विशेष-धातवः

'अस्'-धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

'कृ'-धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

'श्रु'-धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शृणोति | शृणुतः | शृण्वन्ति |
| मध्यमपुरुषः | शृणोषि | शृणुथः | शृणुथ |
| उत्तमपुरुषः | शृणोमि | शृण्वः/शृणुवः | शृण्मः/शृणुमः |

'दा'-धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददाति | दत्तः | ददति |
| मध्यमपुरुषः | ददासि | दत्थः | दत्थ |
| उत्तमपुरुषः | ददामि | दद्वः | दद्मः |

© NCERT not to be republished

| ‘ज्ञा’-धातुः | | | | ‘क्री’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | जानाति | जानीतः | जानन्ति | प्रथमपुरुषः | क्रीणाति | क्रीणीतः | क्रीणन्ति |
| मध्यमपुरुषः | जानासि | जानीथः | जानीथ | मध्यमपुरुषः | क्रीणासि | क्रीणीथः | क्रीणीथ |
| उत्तमपुरुषः | जानामि | जानीवः | जानीमः | उत्तमपुरुषः | क्रीणामि | क्रीणीवः | क्रीणीमः |

## आत्मनेपदिधातूनां लट्-लकारस्य रूपाणि (वर्तमानकालः)

### लट्-लकारः (वर्तमानकालः)

| ‘भाष्’-धातुः | | | | | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भाषते | भाषेते | भाषन्ते | प्रथमपुरुषः | सः भाषते | तौ भाषेते | ते भाषन्ते |
| मध्यमपुरुषः | भाषसे | भाषेथे | भाषध्वे | मध्यमपुरुषः | त्वं भाषसे | युवां भाषेथे | यूयं भाषध्वे |
| उत्तमपुरुषः | भाषे | भाषावहे | भाषामहे | उत्तमपुरुषः | अहं भाषे | आवां भाषावहे | वयं भाषामहे |
| एवम् – स्पर्ध्, यत्, वृध् (वर्ध्), कूर्द्, कम्प्, राज् इत्यादयः | | | | | | | |

## परस्मैपदि-धातूनां लृट्-लकारस्य रूपाणि (भविष्यत्कालः)

### लृट्-लकारः (भविष्यत्कालः)

| ‘पठ्’-धातुः | | | | ‘लिख्’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति | प्रथमपुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ | मध्यमपुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः | उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |
| एवम् – खाद्, वद्, मिल्, हस्, चल्, त्यज्, स्मृ (स्मर्), पा (पिब्), क्रीड्,<br>नी (नय्), प्रछ् (पृच्छ्), भू (भव्), दृश् (पश्य्) गम् (गच्छ्), इत्यादयः | | | | | | | |

| विशेष-धातवः | | | | | | | |
|---|---|---|---|---|---|---|---|
| ‘अस्’-धातुः (भू इति आदेशः भवति) | | | | ‘कृ’-धातुः | | | |
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति | प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ | मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः | उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |
| एवम् – अन्यानि अपि श्रु - श्रोष्यति, दा - दास्यति, ज्ञा - ज्ञास्यति, क्रीञ् - क्रेष्यति इत्यादयः | | | | | | | |

© NCERT not to be republished

## आत्मनेपदिधातूनां लृट्-लकारस्य रूपाणि (भविष्यत्कालः)

### लट्-लकारः (वर्तमानकालः)

| 'भाष्'-धातुः | | | | 'यत्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भाषिष्यते | भाषिष्येते | भाषिष्यन्ते | प्रथमपुरुषः | यतिष्यते | यतिष्येते | यतिष्यन्ते |
| मध्यमपुरुषः | भाषिष्यसे | भाषिष्येथे | भाषिष्यध्वे | मध्यमपुरुषः | यतिष्यसे | यतिष्येथे | यतिष्यध्वे |
| उत्तमपुरुषः | भाषिष्ये | भाषिष्यावहे | भाषिष्यामहे | उत्तमपुरुषः | यतिष्ये | यतिष्यावहे | यतिष्यामहे |
| एवम् – स्पर्ध्, वृध् (वर्ध्), कूर्द्, कम्प्, राज् इत्यादयः | | | | | | | |

## परस्मैपदि-धातूनां लङ्-लकारस्य रूपाणि (भूतकालः)

### भूतकालः (वर्तमानकालः)

| 'पठ्'-धातुः | | | | 'लिख्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् | प्रथमपुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत | मध्यमपुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम | उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |
| एवम् – लिख्, खाद्, वद्, प्रछ् (पृच्छ्), मिल्, क्रीड्, हस्, चल्, त्यज्, स्मृ (स्मर्), पा (पिब्), नी (नय्), भू (भव्), दृश् (पश्य्) गम् (गच्छ्) इत्यादयः | | | | | | | |

| विशेष-धातवः | | | | | | | |
|---|---|---|---|---|---|---|---|
| 'अस्'-धातुः | | | | 'कृ'-धातुः | | | |
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् | प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त | मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | आसम् | आस्व | आस्म | उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म |

| 'श्रु'-धातुः | | | | 'दा'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अश्रृणोत् | अश्रृणुताम् | अश्रृण्वन् | प्रथमपुरुषः | अददात् | अदत्ताम् | अददुः |
| मध्यमपुरुषः | अश्रृणोः | अश्रृणुतम् | अश्रृणुत | मध्यमपुरुषः | अददाः | अदत्तम् | अदत्त |
| उत्तमपुरुषः | अश्रृणवम् | अश्रृणुव | अश्रृणुम | उत्तमपुरुषः | अददाम् | अदद्व | अदद्म |

© NCERT not to be republished

| ‘ज्ञा’-धातुः | | | | ‘क्री’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अजानात् | अजानीताम् | अजानन् | प्रथमपुरुषः | अक्रीणात् | अक्रीणीताम् | अक्रीणन् |
| मध्यमपुरुषः | अजानाः | अजानीतम् | अजानीत | मध्यमपुरुषः | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| उत्तमपुरुषः | अजानाम् | अजानीव | अजानीम | उत्तमपुरुषः | अक्रीणाम् | अक्रीणीव | अक्रीणीम |

## परस्मैपदि-धातूनां लोट्-लकारस्य रूपाणि
### (आज्ञार्थे, प्रार्थनार्थे, विध्यर्थे, निमन्त्रणार्थे, आमन्त्रणार्थे)

| ‘पठ्’-धातुः | | | | ‘लिख्’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु | प्रथमपुरुषः | लिखतु | लिखताम् | लिखन्तु |
| मध्यमपुरुषः | पठ | पठतम् | पठत | मध्यमपुरुषः | लिख | लिखतम् | लिखत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम | उत्तमपुरुषः | लिखानि | लिखाव | लिखाम |

एवम् – लिख्, खाद्, वद्, प्रछ् (पृच्छ्), मिल्, क्रीड्, हस्, चल्, त्यज्, स्मृ (स्मर्), पा (पिब्), नी (नय्), भू (भव्), दृश् (पश्य्) गम् (गच्छ्) इत्यादयः

### विशेष-धातवः

| ‘अस्’-धातुः | | | | ‘कृ’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अस्तु | स्ताम् | सन्तु | प्रथमपुरुषः | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुषः | एधि | स्तम् | स्त | मध्यमपुरुषः | कुरु | कुरुतम् | कुरुत |
| उत्तमपुरुषः | असानि | असाव | असाम | उत्तमपुरुषः | करवाणि | करवाव | करवाम |

| ‘श्रु’-धातुः | | | | ‘दा’-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शृणोतु | शृणुताम् | शृण्वन्तु | प्रथमपुरुषः | ददातु | दत्ताम् | ददतु |
| मध्यमपुरुषः | शृणु | शृणुतम् | शृणुत | मध्यमपुरुषः | देहि | दत्तम् | दत्त |
| उत्तमपुरुषः | शृणवानि | शृणवाव | शृणवाम | उत्तमपुरुषः | ददानि | ददाव | ददाम |

© NCERT not to be republished

| 'ज्ञा'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | जानातु | जानीताम् | जानन्तु |
| मध्यमपुरुषः | जानीहि | जानीतम् | जानीत |
| उत्तमपुरुषः | जानानि | जानाव | जानाम |

| 'क्री'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | क्रीणातु | क्रीणीताम् | क्रीणन्तु |
| मध्यमपुरुषः | क्रीणीहि | क्रीणीतम् | क्रीणीत |
| उत्तमपुरुषः | क्रीणानि | क्रीणाव | क्रीणाम |

## परस्मैपदि-धातूनां विधिलिङ्-लकारस्य रूपाणि
## (आज्ञार्थे, प्रार्थनार्थे, विध्यर्थे, निमन्त्रणार्थे, आमन्त्रणार्थे)

| 'पठ्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

| 'लिख्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | लिखेत् | लिखेताम् | लिखेयुः |
| मध्यमपुरुषः | लिखेः | लिखेतम् | लिखेत |
| उत्तमपुरुषः | लिखेयम् | लिखेव | लिखेम |

एवम् – खाद्, वद्, प्रछ् (पृच्छ्), मिल्, क्रीड्, हस्, चल्, त्यज्, स्मृ (स्मर्), पा (पिब्), नी (नय्),भू (भव्), दृश् (पश्य्) गम् (गच्छ्) इत्यादयः

### विशेष-धातवः

| 'अस्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | स्यात् | स्याताम् | स्युः |
| मध्यमपुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमपुरुषः | स्याम् | स्याव | स्याम |

| 'कृ'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमपुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमपुरुषः | कुर्याम् | कुर्याव | कुर्याम |

| 'श्रु'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शृणुयात् | शृणुयाताम् | शृणुयुः |
| मध्यमपुरुषः | शृणुयाः | शृणुयातम् | शृणुयात |
| उत्तमपुरुषः | शृणुयाम् | शृणुयाव | शृणुयाम |

| 'दा'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | दद्यात् | दद्याताम् | दद्युः |
| मध्यमपुरुषः | दद्याः | दद्यातम् | दद्यात |
| उत्तमपुरुषः | दद्याम् | दद्याव | दद्याम |

© NCERT not to be republished

| 'ज्ञा'-धातुः | | | | 'क्री'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | जानीयात् | जानीयाताम् | जानीयुः | प्रथमपुरुषः | क्रीणीयात् | क्रीणीयाताम् | क्रीणीयुः |
| मध्यमपुरुषः | जानीयाः | जानीयातम् | जानीयात | मध्यमपुरुषः | क्रीणीयाः | क्रीणीयातम् | क्रीणीयात |
| उत्तमपुरुषः | जानीयाम् | जानीयाव | जानीयाम | उत्तमपुरुषः | क्रीणीयाम् | क्रीणीयाव | क्रीणीयाम |

## अधिकं जानीमः (सन्धीनां सामान्यः परिचयः)

### सन्धयः

उच्चारणसमये परस्परं वर्णानाम् अत्यन्तं सामीप्यं 'संहिता' भवति। यदा संहिता भवति तदा वर्णेषु परिवर्तनं भवति। एवं प्रकारेण यत्र संहिताद्वारा वर्णानां परिवर्तनं भवति तस्यैव 'सन्धिः' इति नाम। व्याकरणे प्रमुखतया त्रयः सन्धयः सन्ति। तेषां पुनः बहवः प्रभेदाः सन्ति। यथा –

सन्धिः- (१) स्वरसन्धिः (२) व्यञ्जनसन्धिः (हल्-सन्धिः) (३) विसर्गसन्धिः

**स्वरसन्धयः (अच्-सन्धयः) – सप्त प्रकाराः**

१. सवर्णदीर्घसन्धिः २. गुणसन्धिः ३. वृद्धिसन्धिः ४. यण्-सन्धिः

५. अयादिसन्धिः ६. पूर्वरूपसन्धिः ७. प्रकृतिभावसन्धिः

एतेषु स्वरसन्धिषु केषाञ्चन सन्धीनां सामान्यः परिचयः अत्र प्रदत्तः वर्तते।

**१. सवर्णदीर्घ-सन्धिः** – 'अ इ उ ऋ' एतेषां वर्णानाम् अनन्तरं यदि समानवर्णः भवति तर्हि तयोः द्वयोः वर्णयोः स्थाने एकः दीर्घः आदेशः भवति।

**नियमः** – (क) अ + अ = आ, (ख) अ + आ = आ, (ग) आ + अ = आ, (घ) आ + आ = आ

| दीर्घस्य 'आ'वर्णादेशस्य उदाहरणानि पठन्तु। | | दीर्घस्य 'ई'वर्णादेशस्य उदाहरणानि पठन्तु। | |
|---|---|---|---|
| तत्रापि = तत्र + अपि | (अ + अ = आ) | रवीन्द्र = रवि + इन्द्रः | (इ + इ = ई) |
| तथापि = तथा + अपि | (आ + अ = आ) | गौरीति = गौरी + इति | (ई + इ = ई) |
| **दीर्घस्य 'ऊ'वर्णादेशस्य उदाहरणानि पठन्तु।** | | **दीर्घस्य 'ऋ'वर्णादेशस्य उदाहरणानि पठन्तु।** | |
| गुरूपदेशः = गुरु + उपदेशः | (उ + उ = ऊ) | मातॄणम् = मातृ + ऋणम् | (ऋ + ऋ = ॠ) |
| वधूपचारः= वधू + उपचारः | (ऊ + उ = ऊ) | भ्रातॄणम् = भ्रातृ + ऋणम् | (ऋ + ऋ = ॠ) |



© NCERT not to be republished

२. **गुण-सन्धिः** – अ, आ वर्णयोः इ, ई परे 'ए'कारः आदेशः भवति। अ, आ वर्णयोः उ, ऊ परे 'ओ'कारः आदेशः भवति। तथैव अ, आ वर्णयोः ऋ/ ॠ परे 'अर्' आदेशः भवति। एषः एव "गुणसन्धिः" इति। "ए, ओ, अर्" एते गुणाक्षराणि भवन्ति।

नियमः – (1) अ/आ + इ/ई = ए, (2) अ/आ + उ/ऊ = ओ, (3) अ/आ + ऋ/ ॠ = अर्

| **अ, आ वर्णयोः इ, ई परे 'ए'कारस्य आदेशः।** | | **अ, आ वर्णयोः उ, ऊ परे 'ओ'कारस्य आदेशः।** | |
|---|---|---|---|
| सुरेन्द्रः = सुर + इन्द्रः | (अ + इ = ए) | परोपकारः = पर + उपकारः | (अ + उ = ओ) |
| कथेति = कथा + इति | (आ + इ = ए) | महोत्सवः = महा + उत्सवः | (आ + उ = ओ) |
| **अ, आ वर्णयोः ऋ, ऋ परे 'अर्'आदेशः।** | | एवं प्रकारेण गुणसन्धेः अन्यानि उदाहरणानि भवितुमर्हन्ति। | |
| सप्तर्षिः = सप्त + ऋषिः | (अ + ऋ = अर्) | | |
| महर्षिः = महा + ऋषिः | (आ + ऋ = अर्) | | |

३. **वृद्धि-सन्धिः** – अ, आ वर्णयोः ए,ऐ परे 'ऐ'कारः आदेशः भवति। अ, आ वर्णयोः ओ, औ परे 'औ'कारः आदेशः भवति। तथैव अ, आ वर्णयोः अर्, आर् परे 'आर्' आदेशः भवति। एषः एव "वृद्धिसन्धिः" इति। "ऐ, औ, आर्" एते वृद्धि-अक्षराणि भवन्ति।

नियमः – (1) अ/आ + ए/ऐ = ऐ, (2) अ/आ + ओ/औ = औ, (3) अ/आ + अर्/आर् = आर्

| **अ, आ वर्णयोः ए/ऐ परे 'ऐ'कारस्य आदेशः।** | | **अ, आ वर्णयोः ओ, औ परे 'औ'कारस्य आदेशः।** | |
|---|---|---|---|
| **एकैकम्** = एक + एकम् | (अ + ए = ऐ) | **परमौषधिः** = परम + ओषधिः | (अ + ओ = औ) |
| **तथैव** = तथा + एव | (आ + ए = ऐ) | **मधुरौदनम्** = मधुर + ओदनम् | (अ + ओ = औ) |

४. **यण्-सन्धिः** – इ/ई, उ/ऊ, ऋ/ ॠ, ऌ वर्णानां असवर्णस्वरे परे क्रमशः तयोः स्थानयोः क्रमश) 'य्, व्, र्, ल्' आदेशाः भवन्ति। इ/ई वर्णयोः असवर्णस्वरे परे 'य'कारः आदेशः भवति। उ/ऊ वर्णयोः असवर्णस्वरे परे 'व'कारः आदेशः भवति। ऋ/ ॠ वर्णयोः असवर्णस्वरे परे 'र्'कारः आदेशः भवति। 'ऌ' वर्णात् असवर्णस्वरे परे 'ल्'कारः आदेशः भवति। एषः एव "यण्सन्धिः" इति। "य्, व्, र्, ल्" एते यण्-वर्णाः भवन्ति।

नियमः – (1) अ/आ + ए/ऐ = ऐ, (2) अ/आ + ओ/औ = औ, (3) अ/आ + अर्/आर् = आर्

| **इ/ई वर्णयोः असवर्णस्वरे परे 'य'कारस्य आदेशः।** | | **उ/ऊ वर्णयोः असवर्णस्वरे परे 'व'कारस्य आदेशः।** | |
|---|---|---|---|
| **इत्यपि** = इति + अपि | (इ + अ = य) | **मध्वरिः** = मधु + अरिः | (उ + अ = व) |
| **तान्येव** = तानि + एव | (इ + ए = ये) | **स्वागतम्** = सु + आगतम् | (उ + आ = वा) |

© NCERT not to be republished